A.C. Joshi Library
P.U. Chandigarh

MSS No. 375 Subject

Name of MSS वेदान्त विचार

Author

Period Folios 133

Script Devnagiri Source Pirthi Pal Singh

Missing Folios

A. no. 375

No 5
Vedaint Vicharnam

10 1/2 X 6 1/2

वेदान्त विचार
१२१ पत्रक ॥ ल० ग्र० २५ पं० प्र० पू०

ह० ल०

ॐ श्रीगुरुगणपतिभ्यो नमः

प्रणिपत्य परात्मानं वेदान्तार्थविचारणाम्
कुर्वे निरस्य वेदान्ते दुर्वचोज्ञानवैदिकाम्
दुर्वाक्यमूलकुकल्पनाम्

...वेश्वरमेके चित् ~~जीवेश्वरयोरभेदम्वदन्ति~~ आधुनिकाजना ~~जीवेश्वर~~
: जीवपृथ्व्विधे ~~सिद्धेसि~~ भेदे प्रत्यक्षादिप्रमाणैः सिद्धे
...षि प्रभेदम्वदन्ति - तत्र च ~~श्रुतीः प्रमाणयन्ति~~
सदेव सौम्येदमग्र आसीत्
एकमेवाद्वितीयं ब्रह्म छांदोग्य। ६.२
इति श्रुतीः प्रमाणयन्ति - अत्राद्वितीयमि
तिपदेन सजातीयविजातीयस्वगतभेदशून्यं
ब्रह्मेति स्वीकुर्वन्ति च तेषु प्रष्टव्याः एतादृशेन
निर्विशेषेणानिरीहेण विचित्रजगदुत्पत्त्यादि
व्यापारः किमर्थं कथं च कृतः मायाङ्गीकारे
णेति चेत् तदानीं निर्विशेषज्ञानमात्रस्वरूपं
ब्रह्म मायातिष्ठतीति किं जानाति न वा अ
द्ये ज्ञानमात्रस्य कथं ज्ञातृत्वम् द्वितीये अ
ज्ञात्वा कथमङ्गीकरोति अपि च मायास्वीका
रात्पूर्वं मायास्वीकाराद्गुणशून्यमुपगमे
निर्विशेषत्वहानिः प्रसज्येत
किञ्च तदानीं किं मायाविलक्षणं ब्रह्म उ
ताहो वैलक्षण्येन मायात्मकम् आद्ये वस्तुतः
परिच्छेदादनन्तत्वं ब्रह्मणो गतम् देशका

1

ॐ श्रीगणेशायनमः - परमेश्वरकोंप्रणामकर वेदान्ति
यों की भ्रममूलक कल्पनाकों दूरकर वास्तव वेदा
न्तसिद्धान्तको प्रकाशकरताहुं -
कई एक आधुनिकलोक पांचप्रकारकाभेद प्रत्य
क्षादि प्रमाणोंकर के सिद्धभी है तोभी अभेदकोंकहते
हें - पांचप्रकार ये हहे - जीवईश्वरकाभेद १ जीवों
कापरस्परभेद २ जीवकाओ जगत्काभेद ३ ज
गत्कापरस्परभेद ४ ईश्वरकाओ जगत्काभेद ५
वोह अभेद होनेमें इसछांदोग्यउपनिषद
के प्रपाठ ६ की इसश्रुतिकोंकहते हे - सदेव सौम्येद
मग्र आसीदेकमेवाद्वितीयम् - इसमें अद्वितीयं
इसशब्दका अर्थ सजातीय १ विजातीय २ स्वगतभेद र
हितब्रह्म हे - ये हकहते हे - उनको ये हहमपूछते हे -
निर्विशेष अर्थात् निर्गुणनिराकार और चेष्टारहितब्र
ह्मनें विचित्रजगत्की उत्पत्यादि व्यापार कैसें औरक्यों
कीया - उत्तर - मायाके अंगीकार करनेसे - सिद्धांती
पूछताहे - कि निर्विशेष ज्ञानमात्रस्वरूप ब्रह्म - माया
स्वीकार है - इसबातको - जानताहे वानहीं - उत्तर जा
नताहे सिद्धं ज्ञानमात्रस्वरूप ज्ञाताकैसेंहोया -
उ० नहीं जानता सि० अज्ञानीब्रह्म अंगीकारके
सेंकरताहे - और ये हभीहे मायास्वीकारसेपह
ले मायाके स्वीकारकरनेकी शक्तिकेस्वीकारकरनेमें
ब्रह्मकी निर्विशेषताकी अर्थात् निरीहताकी हानि
हुयी किञ्च उसकालमें मायासे पृथक् हैं ब्रह्मवा
मायात्मक है सि० नाद्यः वस्तुपरिच्छेद होनेंते
सत्यंज्ञानमनन्तंब्रह्म इसश्रुतिमें ब्रह्मकोंजो
अनंतकहा सोअनंतत्वनारहा - देशकालवस्तुप
रिच्छेदशून्यकोंअमनें अनन्तमानाहे - मायारूप

त्ववस्तुपरिच्छेदकत्वस्यैवानन्तत्वात्-

द्वितीये अङ्गीकारवचनं निरर्थकम् सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्यमप्यपार्थं स्यात् सजातीयविजातीयव्यावृत्त्यर्थं हि लक्षणम् भवति तत्तु तदन्याभिन्नतन्निष्ठधर्मे बोधोपयोगि भवति तदन्याभावे लक्षणत्वं कथम्- ततः ४

ननु शिष्योपदेशाय अध्यारोपापवादन्यायेन दुच्यते अत्र सर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि सच्चिदानन्दाद्वये ब्रह्मण्यज्ञानादिसकलजडसमूहस्यावस्तुन आरोपः अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपम् अन्यथा निर्विशेषस्य कथं जगत्कारणतेति चेन्नहि जगतोऽवस्तुत्वेन जगदन्तर्गत शिष्याचार्यतदुपदिष्टज्ञानानामपि मिथ्यात्वेन कल्पिताचार्योपदिष्टज्ञानेन कल्पितेन कल्पित

ना न शिष्यस्य कार्यसिद्धिः निर्विशेषचिन्मात्रातिरिक्तवस्तुनो मिथ्यात्वेन मोक्षार्थश्रवणादिप्रयत्नस्यापि वैयर्थ्यं कल्पिताचार्यायत्तत्वाच्छ्रवणादेः तत्त्वमस्यादिवाक्यजन्यं बन्धनिवर्त्तकं अविद्यात्मकत्वात्स्वप्नवंध × ज्ञानमपि × निवर्त्तकवाक्यजन्यज्ञानवत्-

ननु चाचार्यतज्ज्ञानयोः कल्पितत्वेपि स्वप्नदृष्टशिक्षा... इत्यादि नवबोधवत् ज्ञानमप्यबाधितमेवेति चेन्न दृष्टान्ते कथं वैषम्यम् दृष्टान्ते परोक्षे सर्वैव सत्यात्... सिद्धरूपासदर्पावलम्बि

रमार्थदोषस्यास्य

२

२ वस्तुसेइसकावरिच्छेदहूया-नद्वितीयः अंगीकारकर
णाव्यर्थहूया-अंगीकारद्वैजीवस्तुकाहोताहै-जेकरब्रह्म
मायात्मकहै तोअंगीकारकिसका- किञ्च- सत्यंज्ञान
मनंतंब्रह्म येह स्वरूपलक्षणवाक्यहै येह भी
व्यर्थहूया- क्योंकि लक्षण सजातीयविजाती
यसेभेदकरनेकेलीयेहोताहै- लक्षण तदन्य
में जोनारहै और तन्निष्ठजोधर्मउसकोबो
धकउपयोगीहोताहै- जेकर ब्रह्मतेअन्यकु
छहैहीनहीं तोलक्षणव्यर्थ- वे.ब्रु. अध्यारो
पापवादन्यायसे शिष्यकेउपदेशवास्ते ऐसाक
हागयाहै- अवस्तुमेंजोवस्तुकाआरोपइसकोअध्या
रोपकहतेहैं- जैसे असर्परूपरज्जुमेंसर्पकाआरोप
इसकोंअध्यारोपकहतेहैं- आरोपकानिषेधसोअ
पवाद- अज्ञान सत्असत्करकेअनिर्वाच्य
अज्ञानविरोधि त्रिगुणात्मकभावरूपहै- अन्यथा
निर्विशेषब्रह्मकोजगत्कारणतानहीहोसकती-
सि.ब्रू. तुमारेमतमे जगत्अवस्तुहै- जगदन्तर्गत
शिष्यआचार्य आचार्योपदिष्टज्ञान येह सभमि
थ्याहैं कल्पितआचार्योपदिष्टकल्पितज्ञानसेक
ल्पितशिष्यकाकौनअर्थसिद्धहोगा- ब्रह्मातिरिक्त
वस्तुतोमिथ्याहै सो तवातो श्रवणमननादिश्र
वनिष्फलहूया- श्रवणादि मिथ्याचार्यकेअधी
नहैं- तत्वमस्यादिवाक्यजन्यज्ञानभीबंधनिवर्त्त
कनहीं अविद्यारूपहोनेसे- स्वप्नबंधमोचकवा विर
क्यजन्यज्ञानवत्-
वे.ब्रु.- आचार्य औ तदुपदिष्टज्ञानकल्पितभीहै
स्वप्नदृष्टसिंहकेभयसे जैसेंप्रबोधहोताहै अर्थात्
जागपड़ताहै तैसेज्ञानोत्पत्तिहोतीहै-

न च यज्ज्ञानरूपो वलिरिति न्याये न कल्पितस्य ज्ञानस्य कल्पितेन तत्त्वमस्या
दिवाक्यजन्यवृत्तिज्ञानेन नाशः संभवतीति वाच्यम् कल्पितस्य यावद्
ज्ञानं प्रतिहेतुना ज्ञानस्य मध्यं प्रति भयस्य प्रबोधं प्रति
प्रवृत्तोपि देवदत्तः परमार्थः दृष्टान्तेन सर्वस्य मिथ्या
त्वमिति वेदयम् किंच गृहे रेव वरज्जुसर्पे गृहे रे
वपदार्गतिः - सहि विघ्नं जनयति तच्चेष्ट जन्म
न स्यैन दुःखेन कदाचन - आचार्यं मां विजानी
त्यादि यादिश्रुतिस्मृतिविरोधः आचार्यस्याविद्य
कत्वे कथं न परामर्शनीयः -
अनन्तज्ञानदशायामुपदेशादयः सत्या एव
जाते तु ज्ञाने यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन क
म्पश्येदित्यादिश्रुतेर्न द्वैतदर्शनमिति चेन्नहि
अद्वितीयात्मसाक्षात्कारादिनमूलौ ज्ञानन
न्कार्यस्य गुरोः कथं द्वैतदर्शनपूर्वको उपदेश
दि व्यवहारः सिद्ध्येयुः -
बाधितानुवृत्येति चेत् सम्यक् ज्ञानोत्पत्तिवेला
यां बाधितानुवृत्तिः सिद्ध्यति नवा - आद्ये ज्ञाने
नतु तद्ज्ञानं येषां नाशितमात्मनः तेषामादि
त्यवज्ज्ञानमिति गीतावाक्यविरोधः अन्त्ये
व विरोधश्च यत्र त्वस्येति श्रुतिविरोधश्च - २
ज्ञसाक्षात्कारदशायां सर्वभ्रमोज्ज्वलन्येत्व
द्वितीये उपदेशसमये सम्यग्ज्ञानस्य प्रवृत्तभावरूप
त्वेन बाधितानुवृत्तेरसंभवात् कथं द्वैतदर्शनं
त्पूर्व नं कोपदेशाश्च -
किंच भागवते विद्यावितो मोह मयान्धकारे
य आभाति तो मे नव सन्निधानात् विभावसोः
किं नु समीपस्य शीतं तमो भीः प्रभवन्त्यजा
येति वदत उद्धवस्य तत्त्वज्ञाने स्फुरति बाधिता
जाग्रितत्यक्तेनासत्त्वात् दार्ष्टान्तिकेऽप्येदस्याप्यसत्त्वेन प्रकृतार्थतालिः सहि
प्रमाणजाते कृत्स्नानेन लिनवचीकारे प्राक्तव्यवसायः संभवति -
ज्ञानसंलापि प्याप्य न साधनवत्त्वाध्यवसायान्तर्भावान्
नमानां वा x सेयमा x x तिx दिवाकरात्मनः वेदान्तस्य x २

कल्पितस्य पदकाशेन नष्टत्वमोक्षि वृत्तिव x २
भोजनेनतृ धादि निवृ त्यदर्शनात् उपयोगनाश शिकात्वेनदी पप्रकाशत मोहशान स्वेवबम्या को नचगं
जाङ्गे संता जिता सर्वी नाशतो दोवा दशाद्यश्यने x मूला x अप्रसन्ना मनकोपि न्यासंभोग सुरवमस देवकुशा नामिति वाच्यम् अ ज्ञानसभा कानये बौनुनामा वो विद्यते स तदति गीता स्यासिद्धान विशेषात् तत्त्वमस्यादि वाक्यजन्यस्मा नस्पृष्टा

3 सिद्धं॰ येह दृष्टान्त विषम है- कैसें- स्वप्नमें परमार्थदेव
२ तिन्हहै तिंहरूपमिथ्याज्ञानकाहेतुहै वो दृष्टान्त अपप्र
तिकारणहै- अपप्रबोधप्रतिहेतुहै- चक्षुआदेवदत्तपर
मार्थहै- इसमेंस्वाप्नऔचक्षुआदेवदत्तसत्यहैं- दृष्टान्त
मारेमेंसमहीमिथ्याहैं- येहविषमताहै-
वे: ब्रू:

नुवृत्त्यसम्भवेन मोऽस्तु ते महायोगिन्प्रपन्नमनु
शाधि माम् यथा त्वच्चरणाम्भोजे रतिः स्याद
नपायिनीति भेददर्शनमूलकविज्ञापनं क
थं सम्भवेत् रज्जुसाक्षात्कारदशायां सर्पभ्रमो
नुपपत्तिवत् तदनुपपत्ते उपदिश्यमानतत्त्वज्ञा
नानुसन्धानेनाद्वितीयात्मसाक्षात्कारे सति वि
धितत्त्वानुवृत्त्यनुपपत्त्योपदेशानुपपत्तिस्याद
वस्था तथा च भगवदु दिष्टज्ञानावधार
णानन्तरं नष्टो मोह इत्यादिवचसा तच्च सा
क्षात्कारदशायां बाधितानुवृत्त्यसम्भवे त
त्वत्प्रसादात् स्थितोऽस्मि गतसन्देहः पुनर्वि
षयकं तव वचनं करिष्य इति द्वैतदर्शनमू
लकमर्जुनवाक्यं कथं सङ्गच्छेत-
परमार्थदोषदर्शनमूलके रज्जुसर्पादिदृष्टान्ते
ऽपरमार्थमूलेयं बाधितानुवृत्तिः दुःखाद्य
पि यदि कथञ्चिदुच्येत तदा द्वैतज्ञस्यैव बो
ध्यतां प्रथमसमन्वयाद्यसूत्रवाक्यादिनाधि
तस्य गतज्ञानत्वात् ईश्वरस्य तु यः सर्वज्ञः सर्व
वित्-स्वाभाविकी ज्ञानबलक्रिया च-यो
वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः इत्या
दिश्रुतिविरोधात् कथं तस्य द्वैतदर्शनमूलको
ऽपदेशादिव्यवहारो इति निरूपणीय इ
म् न च मिथ्यात्वेन दर्शनं न सम्यक्ज्ञान
विरोधीति चेत् यदीश्वरोऽपि मिथ्यात्वेनैव
जानातीति न तर्हि ग्रहदोषवशेन न ह्यनन्त

४ 4

तो मिथ्यात्वेनज्ञातात्तद्द्विश्यकिमपिकरोति किञ्च ईश्व
रस्ययावद्विशेषविरोधिब्रह्मस्वरूपावभासे ब्रह्मविव
र्तभूतद्वैतदर्शनंमिथ्यात्वेनापिनसम्भवति नहिभ्र
ष्टौभासमानायां तत्ररजताभासोपपत्तिः एतदनभ्यु
पगमे सर्वविश्वकृत्सर्वविदात्मयोनिरिति ज्ञः का
लकालोगुणी सर्वविद्यः इति तेषामेवानुकम्पा
र्थमित्यादिश्रुतिस्मृत्योर्विरुद्ध्येरन् अपिच चंद्रै
कत्वेज्ञातेद्विचन्द्रदर्शनं [redacted] दोषमन्तरेणनभवे तिमिरा
त् नचेश्वरस्यमिथ्यात्वेनापिद्वैतदर्शनमविद्यादि दि x
दोषंविनाचनसम्भवति दोषाभ्युपगमेतु शुद्धे
महाविभूत्याख्येपरेब्रह्मणि वर्तते मैत्रेयभगव
च्छब्दः सर्वकारणकारणे समस्तहेयरहितंवि
ष्ण्वाख्यंपदमंपदम् - परः पराणांसकलानयत्र
क्लेशादयः सन्तिपरावरेशे इत्यादिनित्यनिर्दु
ष्टत्वप्रतिपादकशास्त्रविरोधः यx
किञ्च नीलरूपाद्याकारेणप्रत्यक्षेणानुभूयँ [redacted] माना
यां मिथ्यात्वेनाप्यनारोपितरजतवत्प्रत्ययः तद्रजतो
पादानाद्यर्थमनुमन्तानांयदिप्रवर्तितैर्येत तदे
श्वरस्यापिसर्वदाद्वयानन्दात्मापरोक्षे मिथ्यात्वेना
पि द्वैतदर्शनं तन्मूलोपदेशादिव्यवहारश्चोप
पद्येरन् अपिच रज्जुसर्पवत् निर्विशेषज्ञानमा
त्रेब्रह्मण्यारोपितस्यप्रपञ्चस्यकोद्रष्टा - नान्यो
तोस्तिद्रष्टेत्यादिश्रुतेर्ब्रह्मैवद्रष्टेतिचेत् ज्ञानमात्र
स्वरूपस्यब्रह्मणः कथंप्रमभूतस्यप्रपञ्चस्यद्रष्टृ
त्वं मायायोगेनेतिचेत् किमयं योगः आगन्तु
कः उत स्वाभाविकः सम्बन्धः नाद्यः विभुत्वतः

नद्वितीयः सदामायाशबलत्वेन तत्सिद्धेर्विशिष्टमेवे
ति सिद्धम् एतेन कथं विजातीयभेदशून्यं ब्रह्मेति
किंच मायाशबलत्वेत्वग्रे बचक्त्वाप्रतीतेः किं का
रणम् ईक्षणाभावादप्रतीतिरिति चेत्तदभा
वे किं कारणम् - इच्छैव चेत् किमग्रेपीच्छा
वद्ब्रह्म तर्हि सर्वदा सविशेषमेवेति सिद्धम्
अपि च अङ्गीकरणात्पूर्वं कमाश्रिता माया
-ब्रह्माश्रितेति चेत् सर्वदा विशिष्टप्रसक्तौ द्वै
तहानिश्च ननु मायाया अपरमार्थत्वान्नो
क्तदोषप्रसक्तिरिति चेत् अपरमार्थशब्दे
न किं विवक्षितम् रज्जुसर्पवन्मिथ्यात्वम्
ब्रह्मसमानसत्ताकाभावत्वं वा नाद्यः अ
ज्ञानं विना ज्ञानविरोधिभावात्मकमिति
स्वसम्प्रदायविरोधात् मयाध्यक्षेण प्रकृ
तिः सूयते सचराचरमित्युक्ता कार्योत्पत्तिः का
रणाभावेन स्यात् असत्यपरोक्षस्यानुकूल
शक्तिमत्त्वरूपकारणत्वासम्भवात् ननु
कार्यस्यासत्त्वेनेष्ट दोषः स्वाप्नशिरश्छे
दनं न कार्यं प्रति स्वाप्नचोरस्य कारणत्वं
दृश्यत इति चेन्न वैधर्म्याच्च स्वप्नादिवदिति न
व्यासप्रणीतसूत्रे अ.२ पाद.२ सू.२९ तथै
कविज्ञानवादिनो योगाचारबौद्धस्य मते सर्वे
बाह्यवस्तु विनैव तज्ज्ञानं भवति यथा जाग्रत्स्य

6

पीति तन्मतनिराकरणायेदं सूत्रं वैधर्म्यात्
स्वाप्नपदार्थजाग्रत्पदार्थयोर्बाधाबाधरूपवै
धर्म्यात् एतेनतदेकदेशिनोवेदान्तिब्रुवस्यमा
यावादिनोपिनिरासोवेद्यः तथा
सत्वाच्चावरस्य अ.२पा.१ अस्यार्थः
यथाचकारणंब्रह्मत्रिषुकालेषुसत्वंनव्यभिचर
ति तथाकार्यमपित्रिषुकालेषुसत्वंनव्यभिच
रति एवंकार्यस्यसत्यत्वप्रतिपादनम् अन्य
थाअसत्यमप्रतिष्ठंतेजगदाहुरनीश्वरमि
त्यादिश्रुतिनत्रसङ्गात् गौरनाद्यन्तवती सा
२ जनयित्रीभूतभाविनी- विकारजननीमस्ता
मष्ट रूपामजां ध्रुवाम्- अस्मान्मायीसृज
ते विश्वमेतत् - अजामेकांलोहित- माया
तु प्रकृतिंविद्यान्मायिनंतु महेश्वरम्-अस्या
वयवभूतैस्तु व्याप्तं सर्वमिदंजगत् - अदार
त्यरतःपरः- ममयोनिर्महद्ब्रह्म- ममया
याद्युरत्यया- प्रकृतिंपुरुषंचैवविद्ध्यनादी
उभावपि इत्यादिश्रुतिस्मृतिविरोधाच्च न
मिथ्याभूतंवस्तु अदारत्वध्रुवत्वपरत्वा
दिभिः शब्दैरुपदिश्यते द्वितीयसूत्रवक्तः प्रकृते
र्ब्रह्मसमानसत्ताकत्वाभावोभ्युपगम्यतएव प्रकृ
तेः सविकारत्वात्ततत्परिणामित्वाच्चैकरूप्या
भावान्नब्रह्मसमानसत्ताकत्वम् अतएवेयम
नत्वादिपदैरुपचर्यते तत्कार्यस्यानित्यत्वेनावि नाः

मावृत्तिरेभाव~~[illegible]~~धर्मसामान्यात्स्वप्नप्रप
ञ्चमृगतृष्णातोयादिवदसन्मिथ्यादिपदैरुप
चारतो व्यपदेशो वैराग्यजननाय-
यच्च उपलभ्यमानविनाशित्वाभ्यां सदसदनि
र्वचनीयत्वेन कार्यस्य मृषात्वमिति वदन्ति त
दसत् उपलब्धिविनाशयोगो हि न मिथ्यात्वं
साधयति किन्त्वनित्यत्वम् यद्देशकालसम्बन्धि
तया उपलभ्यते नोपलभ्यते च तस्यानित्यत्वं उक्तं च अन्त
वन्त इमे देहाः - अविनाशि तु तद्विद्धि - प्रत्यक्षेणानुमा
नेन निगमेनात्मसम्विदा आद्यन्तवदसज्ज्ञात्वा निःसङ्गो स*
विचरेदिह १ शारीरिकसूत्रं - नाभाव उपलब्धेः
अ-२ पा-२ सू-२८ च जगतः सत्त्वं व्यपदिशति - अत
तः प्रत्यक्षं सद्भावग्राहकम् -
अत्र मायावादिन एवमुपतिष्ठन्ते ~~[illegible]~~
*अशेषविशेषप्रत्यनीकं चिन्मात्रं ब्रह्मैव परमार्थः त
च्च नित्यशुद्धबुद्धमुक्तस्वभावमपि तत्त्वमस्यादिसामा
नाधिकरण्याधिगतजीवैक्यं बध्यते मुच्यते च - त
दतिरिक्तनानाविधभोक्तृभोक्तव्यादिप्रपञ्चः सर्वो
पि तस्मिन्नविद्याकल्पितः - सदेव सोम्येदमग्र आ
सीदेकमेवाद्वितीयमित्यादिवचननिचयप्रामाण्या
त् तरति शोकमात्मविदित्यादिश्रुतिशिरःशतव
शेन निर्विशेषब्रह्मात्मैकत्वविद्यया अनाद्यविद्या
निवर्तते मृत्योः स मृत्युमाप्नोति य इह नानेव प
श्यतीति भेदनिन्दाश्रवणेन पारमार्थिकं भेदं नि
ता: राचक्षते ईश्वरचिदचितां भेदो पारमार्थिकः ~~[illegible]~~
~~[illegible]~~ इति -

8

तत्रायं समाधिः भवेदेतदेवं यद्यविद्यायां प्र
माणं विद्येत न चैवमनादिभावरूपं ज्ञानवि
वर्त्यमज्ञानमहमज्ञो मामन्यं च न जानामीति
प्रत्यक्षप्रमाणसिद्धम् तदुक्तम् अनादि
भावरूपं यद्विज्ञानेन विलीयते - तदज्ञान
मिति प्राज्ञा लक्षणं सम्प्रचक्षते - २
न चैतज्ज्ञानाभावविषयमित्याशङ्कनीयम्
को हि किं ब्रूयात् प्रभाकरमतावलम्बी भट्टपाद
दत्तहस्तो वा - तथा हि
स्वरूपपररूपाभ्यां नित्यं सदसदात्म
के वस्तुनि ज्ञायते किञ्चित् केश्चिद्रूपं
कदाचनेति - २
भावान्तरमभावो हि कयाचित्तु व्यपे
क्षया भावान्तरमभावोऽन्यो न कश्चि
दनिरूपणादिति वदता भावव्यतिरि
क्तस्याभावस्या ~~[illegible]~~ नभ्युपगमात्
अभावस्य षष्ठप्रमाणगोचरत्वेन ज्ञान
स्य नित्यानुमेयत्वेन च तदभावस्य प्रत्यक्ष
विषयत्वानुपपत्तेः यदि पुनः प्रत्यक्षाभा
ववादी कश्चिदेवमाचक्षीत तं प्रत्याच
क्षीत - अहमज्ञ इत्यस्मिन्ननुभवेऽहमि
त्यात्मनोऽभावधर्मितया ज्ञानस्य प्रति
योगितया चावगतिरस्ति न वा अस्ति चे
द्विरोधादेव न ज्ञानाभावानुभवसम्भवः

नचेत् धर्मिप्रतियोगिज्ञानसापेक्षो ज्ञानाभा
वानुभवः सुतरां न सम्भवति तस्याज्ञानस्य
भावरूपत्वे प्रागुक्तदूषणाभावादयमनुभ
वो भावरूपाज्ञानगोचरत्वेनाभ्युपगन्तव्यः
तदेतद्गगनरोमन्थायितम् भावरूपस्याज्ञा
नस्य ज्ञानाभावसमानयोगक्षेमत्वात्-
तथाहि विषयत्वेनाश्रयत्वेन च ज्ञानस्या
वर्तकतया प्रत्यगर्थः प्रतिपन्नो न वा
अप्रथश्चेन्न स्वरूपाज्ञाने निवर्त्येत तदज्ञान
मिति तस्मिन्प्रतिपन्ने कथंकारमवतिष्ठे
त द्वितीयपक्षे व्यावर्तकाश्रयविषयशू
न्यमज्ञानं कथमनुभूयेत- अथ विश
दः स्वरूपावभासएवाज्ञानविरोधिनाज्ञा
नेनाभासित इति आश्रयविषयज्ञाने स
त्यपि नाज्ञानानुभवविरोध इति हन्त त
र्हि ज्ञानाभावेपि समानमेतत् अन्यत्रा
भिनिवेशात् तस्मादुभयाभ्युपगतज्ञाना
भावएवाहमज्ञो मामन्यञ्च न जानामी
त्यनुभवगोचर इत्यभ्युपगन्तव्यम्
अस्तु तर्ह्यनुमानम् विवादास्पदं प्रमा
णज्ञानं स्वप्रागभावव्यतिरिक्तस्वविष
यावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्त
रपूर्वकम् अप्रकाशितार्थप्रकाशक
त्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभा

10

१०

वदिति तदपि नद्योदितम् अज्ञानेऽप्यनभिमताज्ञाना
न्तरसाधने अपसिद्धान्तापातात् तदसाधने अनैका
न्तिकत्वात् दृष्टान्तस्य साधनविकलत्वाच्च नहि प्र
दीपप्रभाया अप्रकाशितार्थप्रकाशकत्वं सम्भ
वति ज्ञानस्यैव प्रकाशकत्वात् सत्यपि प्रदीपे
ज्ञानेन विषयप्रकाशसम्भवात् प्रदीपप्रभाया
स्तु चक्षुरिन्द्रियस्य ज्ञानं समुत्पादयतो विरोधि
स्तमसनिरसनद्वारेणोपकारकत्वमात्रमेवे
त्यलमतिविस्तरेण-
प्रतिज्ञयोगश्च विवादाध्यासितप्रज्ञानं नज्ञा
नमात्रप्रकाशितं अज्ञानत्वात् शुक्तिकाद्यज्ञा
नवदिति ननु शुक्तिकाद्यज्ञान[illegible]श्रयस्य प्रत्यगर्थ
स्य ज्ञानमात्रस्वभावत्वमेवेति चेन्मैवं शङ्किष्ठाः अनुभू
तिर्हि स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण
त्वापादकत्वस्वभावा ज्ञानावगतिसंवित्तिविदाद्य
परनामा सकर्मकानुभवितृगुणत्वं ज्ञानत्वमि
त्याश्रयणात् ननु ज्ञानस्वरूपस्यात्मनः कथं ज्ञा
नगुणकत्वमितिचेत्तदसारम् यदा हि मणिद्युम
णिप्रभृतितेजोद्रव्यं प्रभावद्रूपेणावतिष्ठमानं प्र
भारूपगुणाश्रयः स्वाश्रयादन्यत्रापि वर्तमान
पि= त्वेन रूपवत्त्वेन च प्रभाद्रव्यरूपापि तच्छेषत्वनि
बन्धनगुणव्यवहारः एवमयमात्मा स्वप्रका
शचिद्रूप एव चैतन्यगुणः तथा च श्रुतिः स य य
सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन
एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृ
कृत्स्नः

न्तः प्रज्ञानघन एव- अत्रायं पुरुषः स्वयंज्योति
र्भवति- न विज्ञातुर्विज्ञातेर्लोपो विद्यते- अथ यो
वेदेदं जिघ्राणीति स आत्मा योयं विज्ञानमयः
प्राणेषु हृद्यन्तर्ज्योतिः पुरुष एष हि द्रष्टा श्रो
ता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञाना
त्मा पुरुष इत्यादिका श्रुतिरपि-
न चानृतेन हि प्रत्यूढा इति श्रुतिरपि विद्यापर्व
प्रमाणमित्याश्रयितुं शक्यम् ऋतेतरविषयो
त्वात् तद्वाक्यः ऋतशब्दः ऋतकर्मवचनः ऋतमेव
त्तावितिवचनात् ऋतं कर्म फलाभिसन्धिर
हितं परमपुरुषाराधनमेव तत्प्राप्तिफलम्
अनृतं तद्व्यतिरिक्तं सांसारिकाल्पफलं कर्म
नृतं ब्रह्मप्राप्तिविरोधि- य एतं ब्रह्मलोकं न
विदन्ति अनृतेन हि प्रत्यूढा इति वचनात्
मायां तु प्रकृतिं विद्यादित्यादौ मायाशब्दो वि
चित्रार्थसर्गकत्रिगुणात्मकप्रकृत्यभिधाय
को नानिर्वचनीयाज्ञानवचनः
तेन मायासहस्रं तत् शंबरस्याशुगामिना
बालस्य रक्षता देहमेकैकांशेन सूदितम्
इत्यादौ विचित्रार्थसर्गसमर्थस्य पारमार्थिकस्यै
वासुरायुधविशेषस्यैव मायाशब्दाभिधेयत्वो
पलम्भात् अतो न कदाचिदपि श्रुत्या अनिर्वच
नीयाज्ञानप्रतिपादनं नाप्यैक्योपदेशात्तदप

12
२२

त्या तत्त्वंपदयोः सविशेषब्रह्माभिधेयत्वेन विरुद्धयो
र्जीवपरयोः स्वरूपैक्यस्य प्रतिपत्तुमशक्यतयाग्र
र्थापत्तेरनुदयदोषदूषितत्वात् - तथाहि तत्पदं
निरस्तसमस्तदोषमनवधिकातिशयासङ्ख्येयक
ल्याणगुणास्पदं जगदुदयविभवलयलीलं ब्रह्म
प्रतिपादयति तदैक्षत बहु स्यां प्रजायेयेत्यादिषु
तस्यैव प्रकृतत्वात् समानाधिकरणं त्वंपदं वा
चिद्विशिष्टं जीवशरीरं ब्रह्माचष्टे प्रकारद्व
यविशिष्टैकवस्तुपरत्वात् सामानाधिकरण्य
स्य नतु सोऽयं देवदत्त इतिवत् तत्त्वंपदयो
र्विरुद्धभागत्यागलक्षणयो निर्विशेषस्वरू
पमात्मैक्यं सामानाधिकरण्यार्थः किं न स्या
त् यथा सोऽयमित्यत्र तच्छब्देन देशान्तरका
लान्तरसम्बन्धी पुरुषः प्रतीयते इदं श
ब्देन सन्निहितदेशवर्त्तमानकालसम्बन्धी
तयोः सामानाधिकरण्येनैक्यमवगम्यते
तत्रैकस्य युगपद्विरुद्धदेशकालवत्तीतिर्न
सम्भवतीति द्वयोरपि पदयोः स्वरूपपर
त्वे स्वरूपस्यैक्यं प्रतिपत्तुं शक्यमेवमत्रा
पि किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धांशप
रित्यागेनाखण्डस्वरूपं लक्ष्यत इति चेद्विष
मोऽयमुपन्यासः दृष्टान्तेऽपि विरोधवैधुर्ये
ण लक्षणागन्धासम्भवात् एकस्य तावद्भू
तवर्त्तमानकालद्वयसम्बन्धो न विरुद्धः दे

13
१३

शाकरस्थितिर्भूता- सन्निहितदेशस्थितिर्वर्त
नइति देशभेदसम्बन्धविरोधश्च कालभेदेन
परिहरणीयः - लक्षणायत्तेयेकस्यैवपद
स्य लक्षकत्वाश्रयणेन विरोधपरिहारे पद
द्वयस्य लाक्षणिकत्वस्वीकारेण सङ्गच्छते-
ग्रन्थगौरवस्यवक्तुमशक्यतेदन्ताविशिष्टत्वान
वगाहनेन तत्त्वमित्यादेः प्रामाण्यानङ्गी
कारे स्वार्थसिद्धौ नतरां भङ्गवादीवौद्धो
विजयेत- एवमत्रापि जीवपरमात्मनोः
शरीरात्मभावेन तादात्म्यं न विरुद्धमितित्र
त्रियादितम् जीवात्माहि ब्रह्मणः शरीर
तया प्रकारत्वाद् ब्रह्मात्मकः - यश्चात्मनि तिष्ठ
न्नात्मनोऽन्तरः यमात्मा न वेद यस्यात्मा शरीर
मिति श्रुत्यन्तरात् ग्रन्थत्वन्यमिदमुच्यते
सर्वेशब्दाः परमात्मन एव वाचकाः न च प
र्यायत्वम् वा भेदसम्भवात् तथाहि जी
वस्य शरीरतया प्रकारभूतानि देवमनुष्या
दिसंस्थानीव सर्वाणि वस्तूनीति ब्रह्मात्म
कानि x ना x सर्वाणि ग्रतो
देवो मनुष्यो यक्षो वा पिशाचोरगराक्ष
साः पक्षी वृक्षो लता काष्ठं शिला तृणं
घटः पटः इत्यादयः सर्वेशब्दाः प्रकृतिप्र
त्यययोगेनाभिधायकतया प्रसिद्धा लोके तथा
पx

अनया प्रतीयमानतत्तत्स्यानैव वस्तुमुखेन तदीय
मानि जीवतदन्तर्यामिपरमात्मपर्यन्तसंस्थान
स्यवाचका: देवादिशब्दानां परमात्मपर्यन्त
त्वमुक्तं तत्त्वमुक्तावल्यां चतुरन्तरेव-

जीवं देवादिशब्दो वदति तदपृथक्
सिद्धभावाभिधानं निष्कर्षाकूत
युक्तो व्युदसिद्धश्च रूढो लोकवेदप्रयो
गः आत्मा सम्बन्धकाले स्थितिर
नवगता देवमर्त्यादिमूर्तेर्जीवा
त्मानुप्रवेशाज्जगति विभुरपि व्या
करोन्नामरूपे १

अयमेवार्थ: समर्थितो वेदार्थसंग्रहे नामरूप
श्रुतिव्याकरणसमये रामानुजाचार्यैः -
किञ्च सर्वप्रमाणस्य सविशेषविषयतया
निर्विशेषवस्तुनि न किमपि प्रमाणं समस्ति
निर्विकल्पकप्रत्यक्षेपि सविशेषमेव वस्तु
प्रतीयते अन्यथा सविकल्पके सोयमि
ति पूर्वप्रतिपन्नप्रकारविशिष्टप्रतीत्यनुप
पत्तेः किं च तत्त्वमस्यादिवाक्यं न प्रपञ्चस्य तन्नये x
बाधकं भ्रान्तिमूलकत्वात् भ्रान्तिप्रयुक्तार
प्रपंच स्य सत्यत्वे न x ज्जुसर्पवाक्यवत् नापि ब्रह्मात्मैक्यज्ञानं
निवर्तकं तत्र प्रमाणाभावस्य प्रागेवोप
पादनात् न च प्रपञ्चस्य सत्यत्वप्रतिज्ञाप
नमहे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा

आक्षेपः प्रकृतिपुरुषमहदहङ्कारतन्मात्रभूतेन्द्रि
यचतुर्दशभुवनात्मकब्रह्माण्ड तदन्तर्वर्तिदेवति
र्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थि
तं कार्यमपि सर्वं ब्रह्मैवेति कारणभूतब्रह्म
ज्ञानादेव सर्वविज्ञानं भवतीत्येकविज्ञाने
न सर्वविज्ञानस्योपपन्नतरत्वात् अपि च ब्र
ह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वे सर्वस्यास
त्वादेवैकविज्ञानेन सर्वविज्ञानं बाध्येत ना
मरूपविभागानर्हसूक्ष्मदशापन्न प्रकृतिपु
रुषशरीरं ब्रह्म कारणावस्थं जगतस्तदाप
त्तिरेव प्रलयः नामरूपविभागविभक्तस्थू
लचिदचिद्वस्तुशरीरं ब्रह्मकार्यावस्थं ब्रह्म
णस्तथाविधस्थूलभावश्च सृष्टिरित्यभिधीय
ते एवं च कार्यकारणयोरनन्यत्वमप्यारम्भणाधि
करणे प्रतिपादनमुपपन्नतरं भवति निर्गुणवाद
श्च प्राकृतहेयगुणनिषेधविषयतया व्यवस्थिताः
- नानात्वनिषेधवादाश्च एकस्यैव ब्रह्मणः शरी
रतया प्रकारभूतं सर्वं चेतनाचेतनात्मकं व
स्त्विति सर्वस्यात्मतया सर्वप्रकारं ब्रह्मैवा
वस्थितमिति सर्वात्मकब्रह्मपृथग्भूतवस्तु
सद्भावनिषेधपरत्वाभ्युपगमेन प्रतिपाद
ताः यच्चित्सुखाचार्यैः य आत्मनि तिष्ठन्नि
ति श्रुतावाधाराधेयभावेऽप्यौपाधिकस्या न
त्मनो घटाकाशस्य महाकाशाधीनत्ववत्स्वान्त
र्गतात्माधीनतामात्रप्रतिपादनम् अन्यथा

16

नित्यद्रव्याणां स्वतन्त्रतया परस्पराधाराधेयभावा
नुपपत्तेरनङ्गीकाराच्च श्रुतेरानर्थक्यप्रसङ्गात्
। इति अस्य व्याख्या यथा हि घटाकाशो महाकाशे
वर्तत इति व्यपदिश्यते तत्स्वरूपतया तत्रानुग
तत्वात् अन्तरा च महाकाशाधीनो घटाकाश
इति व्यवहारः तद्वदत्राप्यौपाधिकजीवात्म
नः स्वरूपत्वात् परमात्मा तत्र तिष्ठन्निति तन्नि
यमयतीति च परमेश्वराधीनताप्रतिपादना
र्थोऽयं व्यपदेशः ~~[illegible]~~ व्योपि चात्र न कु
ण्डबदरन्यायः तस्मादविच्छिन्नात्मनोरैक्य
परिहाराय उक्तपरिहारो न स्वीकर्तव्यः -
किंच अन्तर्यामिब्राह्मणेऽपि च नान्योऽतोऽस्ति द्रष्टा ना
न्योऽतोऽस्ति श्रोतेत्यात्मभेदनिराकरणम् -
एतत्सर्वं गतगगनरोमन्थायितम्
आत्मन आत्माधीनताया असम्भवात् घटाका
शस्य महाकाशाधीनतानतिरेकात् उपा न
ध्यधीनो हि घटाकाशव्यपदेशः नापि घटाकाशा
न्तरो महाकाश इति वक्तुं शक्यम् विषमो दृष्टा
न्तः पृथिव्यादिष्वपि पूर्वोक्तेष्वपि आधाराधेयत्व
निराकरणस्यानन्तरं करणात् नहि परमात्मनो भि
न्नस्यौपाधिकस्य तच्छरीरत्वेन नियम्यत्वं च त
दवेद्यत्वं चोपपद्यते एकस्वरूपत्वात् -
यत्तु नित्यद्रव्याणामित्यादि तदप्यसारम् परमाणूनां
तार्किकनये आकाशेनाधाराधेयत्वदर्शनात् जीवस्य
पारतन्त्र्यस्य दृष्टान्तेन स्वयमेव निरूपणाच्च उपाधिस्व क
व्याविर्भावासम्भवाच्च आकाशादिभ्योऽप्युत्पत्तिसम्भवात्त
दाधारताया व्यावृत्तिसम्भवात् एवमात्मनोऽपि तत्सूक्ष्म
त्वात् परमात्मन आधारत्वं सम्भावि वलये प्रकृत्यादीनां तत्र

17

वलय श्रवणाच्च तस्मादात्मनीति श्रुतेर्जैनैरर्थैक्यम्
तत्त्वमसीत्यत्र षड्विधलिङ्गैस्तदात्म्यस्यैवोपपाद
नम् तथा हि छान्दोग्ये तत्त्वमसीति नवकृत्वोऽभ्यासाद
नेन जीवेन चार्थवादो पादानादष्ययेऽन्यथा तो विदुरन्य
देवनाद्युपासकाः = दे ज्ञानस्ते ज्ञान्य लोका भवन्तीति एतदन्यथा ज्ञानमिन्द
नादस्य सम्पन्नस्यत इति फलश्रवणादेकमेवाद्वितीय
मेतदात्म्यमिति चोपक्रमोपसंहारयोरेकरूप्यादपू
र्वत्वान्मृदादिदृष्टान्तेनोपपादनात्तदात्म्यवमात्मन
म् । बृहदारण्यकेऽपि अहं ब्रह्मास्मि - सर्वं ब्रह्म
प्रविष्टः योऽन्यां देवतामुपास्ते सदिदं सर्वं भवतीति
श्रुतिभिस्तदात्म्यप्रतिपादनम् -
यत्तु द्वा सुपर्णेत्यत्र चित्सुखाचार्यैरुक्तम् लोकसि
द्धभेदानुवादकत्वमेतत् तदसारम् ईश्वरस्या
लौकिकत्वेन तद्भेदस्य लोकतोऽधिगमासम्भ
वात् -
यत्तु आत्मन एकत्वे पादाद्यवयवेष्विव निखिलशरीरेष्वे
कस्यैवानुसंधानं स्यादित्याशंक्यानुसंधानस्यावश
शरीरभेदादतीतशरीरेष्विवसंभवात् न चातीतत्वमे
वर्तमानोपाधिर्न तु शरीरभेद इतरथा वर्तमानाने
कशरीराधिष्ठातृ योगिव्याप्तस्यते स्वस्यानुसन्धा
नप्रसंगादिति वाच्यम् वर्तमानशरीरेष्वपि नि
दर्शनाभावादेव योगिनमलङ्कुर्वद्भिर्मीमां
सकैरनुसन्धानस्य प्रसञ्जयितुमशक्यत्वात्
योगिनं स्वीकुर्वमाणानां किं कारणमविनयनावाच्छे
न्नस्यात्मनः शब्दाद्यनुसन्धानवदेकशरीरवि
शिष्टस्य शरीरान्तरेऽनुसंधानोपपत्तेः न च य
द्यपि चक्षुरवच्छिन्नस्य शब्दाद्यनुसन्धानं नास्ति त
थाप्यस्यैवैकतद्रूपत्वनक्षितोऽनुसंधाना इतरथा

18

य एवाहं स्वप्नमद्राक्षं स एवाहमस्मीति प्रतिस
-धानाभावप्रसङ्गादिति वाच्यम् उपलब्धितस्य
परमात्मनः सर्वज्ञस्य ~~सर्वज्ञस्य~~ सर्वगतानुसंधा
नेविशेषाभावात् परमात्मानुसंधान्येवेति
न च कर्मयोगाभावः यावन्नाचरणं तत्फलजन
कत्वे कोपूरणाय पालितः स्वव्यापारकत्वे जग
त्रवेदनापरिहाराय भेत्रगात्रव्यापारप्रसंग
स्यदोषत्वादिति वाच्यम् अनुसंधानेपि
तस्याभोक्तृत्वादेव योगिवदीश्वरवच्चैतस्य
तत्तच्छरीरविदुःखपरिहाराय प्रवृत्तेः प्रस
ङ्गात् यथा हि भवतां सर्वज्ञस्येश्वरस्य योगि
नो वा सर्वगतानुसंधानेप्यप्रवृत्तिस्तत्कस्य हे
तोरभोक्तृत्वात् एवमस्मत्पक्षेपि -पुत्वादि
नां च साक्षात्त्वं संसारिधर्मत्वाभावेन तद्वेद
साधकत्वम्- एतेनाद्युक्तम् अनुसंधातुरे
कस्यात्मनः परमात्मभिन्नस्यात्मसत्त्वनत्वानु
संधानात् x चतुर्वर्गवाच्छिन्नत्वx त-
जीवात्मनः परमात्मनो भिन्नानित्याश्च- श्रुतिः वा
सुपर्णा- स: कापिलम् पुरुषबहुत्वं व्यवस्था
तः   नस्य सूक्ष्मत्वे श्रुतिः बालाग्रशतभाग
स्य- आराग्रमात्रः प्रत्योगुणात्माचेत सावे
दितव्यइति
भेदप्रत्यक्षादिप्रमाणाक्षिप्तेश्रुतिविरुद्धेचकथमभेदा
र्थः तथाहि प्रत्यक्षं तावदिदमस्मादन्यमिति
नीलपीतादेर्भेदमध्यवस्यति अथ न्येषाः

19
३८

किं प्रत्यक्षं भेदमेवावगाहते किंवा धर्मिप्रतियोगि
घटितम् न प्रथमः धर्मिप्रतियोगिप्रतिपत्तिमन्त
रेण तत्सापेक्षस्य भेदस्याशक्याध्यवसायत्वात्
द्वितीयेपि धर्मिप्रतियोगिग्रहणपुरस्सरं भेदग्रह
णमथवा युगपत्तत्सर्वग्रहणम् न पूर्वः बुद्धे
र्विरम्य व्यापाराभावात् नान्योन्याश्रयप्रसंगा
च्च नापि चरमः कार्यकारणयोर्यौगपद्याभा
वात् धर्मिप्रतीतिर्हि भेदप्रत्ययस्य कारणं सन्नि
हितेपि धर्मिणि व्यवहितप्रतियोगिज्ञानमन्त
रेण भेदस्याज्ञातत्वेनान्वयव्यतिरेकाभ्यां कार्य
कारणभावावगमात् तस्मान्न भेदप्रत्यक्षं सुप्र
सरमिति चेत् किं वस्तुस्वरूपभेदवादिनं प्रति
इमानि दूषणान्युद्भाव्यन्ते किं धर्मिभेदवादि वा
नं प्रति प्रथमे चोरापराधान्माण्डव्यनिग्रह
न्यायापातः भवदभिधीयमानदूषणानां तद
विषयत्वात् न तु वस्तुस्वरूपस्यैव भेदत्वे प्रतियो व
गिसापेक्षत्वं न घटते घटवत् प्रतियोगिसापे
क्षत्वेन सर्वत्र भेदः प्रथत इति चेन्न प्रथमं सर्व
तो विलक्षणतया वस्तुस्वरूपे ज्ञायमाने प्रति
योग्यपेक्षया विशिष्टव्यवहारोपपत्तेः तथा
प हि परिमाणघटितं वस्तुस्वरूपं प्रथममवग
म्यते पश्चात् प्रतियोगिविशेषापेक्षया ह्रस्वं दी
र्घमिति तदेव विशिष्टव्यवहारभाजनं भवति
तदुक्तं विष्णुतत्त्वनिर्णये न च विशेषणविशे
ष्यतया भेदसिद्धिः विशेषणविशेष्यभावस्य

२०
२.

भेदापेक्षः धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्ष
श्च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्या
सिद्धिः पदार्थस्वरूपस्येत्यादिना "अत एव गवार्थि
नो गवयदर्शनान्न प्रवर्तन्ते गोशब्दं च न स्मरन्ति न
च नीरक्षीरादौ स्वरूपेण ग्रहमात्रे भेदप्रतिभासोपि
स्यादिति भगवत्पादीयम् समानाभिहारादिप्रतिबन्ध
कबलाद्भेदभानव्यवहाराभावोपपत्तेः तदुक्तम्
"अतिदूरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्-
सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च"
"अतिदूरादिति गिरिशिखरवर्तिवृक्षादौ - अतिसामीप्यात् लोचना
ञ्जनादौ - इन्द्रियघातादन्धादेः - मनोनवस्थानात् कामाद्युप
प्लुतमनस्कस्य स्वसंनिकृष्टालोकवर्तिनि घटादौ, सौक्ष्म्यात् परमा
ण्वादौ - व्यवधानात् कुड्याद्यन्तरिते - अभिभवात् दिवाप्र
दीपप्रभादौ - समानाभिहारात् नीरक्षीरादौ यथावद्ग्रहणं"
नाप्यन्त्यः भवन्मते वा धर्मभेदवादे तथापि न
कश्चिद्दोषः धर्मिप्रतियोगिग्रहणे सति धर्मभेद
भानसम्भवात् न च धर्मभेदवादे तस्य तस्य भेद
स्य भेदान्तरभेद्यत्वेऽनवस्थापुरवस्था स्यादित्या
शंक्यम् भेदान्तरप्रसक्तौ मूलाभावात् भेदभे
दिनो भिन्नाविति व्यवहारादर्शनात् - न चैकभेद
बलेनान्यभेदानुमानं दृष्टान्तभेदाविघातेनोत्था
ने दोषाभावात् - सोयं पिण्याकयाचनार्थंगत
स्य खारिकातैलदानाभ्युपगम इव - दृष्टान्त
भेदविमर्दं त्वनुत्थानमेव न हि वरविघाताय
कन्योद्वाहः - तस्मात्फलवत्क्रियाभावादनव
स्थानदोषाय - अनुमानेनापि भेदोऽवसीय

ते -

परमेश्वरो जीवाद्भिन्नः तं प्रति सेव्यत्वात् यो यं प्रति से
व्यः स तस्माद्भिन्नः यथा भृत्याद्राजा न हि स्वस्यैव स्वे
स्याद्भुः स्वमेव न यन्नाम पिशु तिपुरुषार्थमर्थयमानाः
पुरुषाः स्वयं निपदं कामयमानाः सत्कारभाजो
भवेयुः अन्यथा सर्वानर्थभाजनं भवन्ति - यः स्वस्या
त्मनो हीनत्वं परस्य गुणोत्कर्षं च कथयति स त
स्यः प्रीतः सन् सेवकस्य तस्याभीष्टं प्रयच्छति तदु
क्तम् घातयन्ति हि राजानो राजाहमितिवा
दिनः ददत्यखिलमिष्टं स्वगुणो
त्कर्षवादिनामिति ।

एवं च परमेश्वराभेदवादस्य या विष्णोर्गुणोत्कर्ष
स्य स्वगतालिकासमत्वाभिधानं विपुलकदली
फललिप्सया जिह्वाच्छेदनमनुहरति एतादृश
विष्णुविद्वेषणादन्यतमस्य जीवेशभेदात् -
एवं सेव्यत्वादिनापि भेदोऽनुमातव्यः तथा श्रुत्या
पि भेदोऽवगन्तव्यः सत्यमेनमनुविश्वे मदन्ति रा
तिं देवस्य गृणतो मघोनः सत्यासो अस्य महि
मा गृणे शवो यज्ञेषु विप्रराज्ये सत्य आत्मा स
त्यो जीवः सत्यं भिदा सत्यं भिदा मयि वा ऽप्येभ
यि वा ऽप्येभ्यो मयि वाऽप्य एष इति मोक्षानन्दभेदप्र
तिपादकश्रुतिभ्यः - इदं ज्ञानमुपाश्रित्य मम
साधर्म्यमागताः सर्गेऽपि नोपजायन्ते प्रलये न
व्यथन्ति च - जगद्व्यापारवर्जं प्रकरणात् स 6
न्निहितत्वाच्च इत्यादिसूत्रेभ्यश्च न च ब्रह्म वेद
ब्रह्मैव भवतीति श्रुतिबलात् जीवस्य पारमैश्वर्य
शङ्क्य शाकम सम्यग्ज्ञानलाभप्रत्याक्षेपि

स्तोभवेदि त्यिवत् द्वैहितो भवतीत्यर्थपरत्वात् - ननु
अपञ्चो यदि वर्तेत निवर्तेत न संशयः माया
मात्रमिदं द्वैतमद्वैतं परमार्थतः इतिवच
नात् द्वैतस्य कल्पितत्वमवगम्यत इति चेत्सत्यम्
भावमननमिसन्धायाभिधानात् तथाहि यद्यय
मुत्पद्येत तर्हि निवर्तेत न संशयः तस्मादनादि
रेवायं प्रकृष्टः पञ्चविधो भेदप्रपञ्चः नचाय
मविद्यमानः मायामात्रत्वात् मायेति भगवद
च्छोच्यते -
महामायेत्यविद्येति नियतिर्मोहिनीति
च प्रकृतिर्वासनेत्येव तवेच्छानन्तकथ्य
ते ॥ प्रकृतिः प्रकृष्टकरणाद्वासनावास
येद्यतः अहन्त्वाख्यो हरिस्तस्य मायाऽवि
द्येति संज्ञिता ॥ मायेत्युक्ता प्रकृष्टत्वात्प्र
कृष्टे हि मयाभिधा - विष्णोः प्रज्ञप्तिरे
वैका शब्दैरेतैरुदीर्यते ॥ प्रज्ञप्तिस्व
वो हि हरिः साच स्वानन्दलक्षणा -
इत्यादिवचनबलेनो निश्चयप्रमाणबलात् सं
वज्ञा मानगणकर्त्री च यस्य तन्मायामात्रं
ततश्च परमेश्वरेणास्तीतत्वाद्विदितत्वाच्च न
द्वैतं भ्रान्तिकल्पितं नहीश्वरे सर्वस्य भ्रान्तिः
सम्भवति विशेषादर्शननिबन्धनत्वाद्भ्रान्तेः
तर्हि तद्व्यपदेशः कथमिति चेच्छ्रोतरम् अ
द्वैतं परमार्थतः इति परमार्थापेक्षया तेन
सर्वस्याऽनन्तमस्य विश्वतत्त्वस्य समाभ्यधि
कमन्यत्वमकस्मभवति श्रुतिरपि ततस्त

मश्चाभ्यधिकश्च दृश्यत इति तथा च परमा श्रुतिः

जीवेश्वरभिदा चैव जडेश्वरभिदा तथा
जीवभेदो मिथश्चैव जडजीवभिदा तथा॥
मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्च
कः सोऽयं सत्योऽप्यनादिश्च सादिश्चेन्ना
शमाप्नुयात्॥ न च नाशं प्रयात्येष न
चासौ भ्रान्तिकल्पितः- कल्पितश्चे
न्निवर्तेत न चासौ विनिवर्तते॥ द्वैतं
न विद्यत इति तस्मादज्ञानिनां मत
म्- मतं हि ज्ञानिनामेतन्मितं त्रातं
हि विष्णुना॥ तस्मान्मात्रमिति प्रो
क्तं परमो हरिरेव त्वित्यादि-

तस्माद्विष्णोः सर्वोत्कर्षस्वतान्त्र्यं सर्वाग
मानाम् एतदेवाभिसंधायाभिहितं भगवता

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च
क्षरः सर्वाणि कूटस्थोऽक्षर उच्यते - १६
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः
अतोऽस्मि वेदे वेदे लोके च प्रथितः पुरुषोत्तमः १८
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्
स सर्वविद्भजति मां सर्वभावेन भारत - १९
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ-
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २०
गीतासु अ. १५ -

24
२४

महावराहेऽपि - मुख्यं च सर्ववेदानां तात्पर्यं श्रीप
तौ परे उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरमि
ति प्रोक्तं च विष्णोः सर्वोत्कर्षे तात्पर्यम् -
मोक्षो हि परमपुरुषार्थः धर्मार्थकामास्त्वनि
त्याः मोक्षस्त्वनित्यः - तस्मान्नित्यं तदर्थी प्रय
तेत मतिमान्नर इति भाल्लवेयश्रुतेः -
तस्मिन्प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरल
मल्पकास्ते - समाश्रिताद्ब्रह्मतरोरनन्तान्निःसंश
यं मुक्तिफलं प्रयाति इति विष्णुपुराणोक्तेश्च प्रसा
दश्च गुणोत्कर्षज्ञानादेव नाभेदज्ञानादित्युक्तम्

न च तत्त्वमस्यादिनाऽनन्यव्याकोपः श्रुति
तात्पर्यापरिज्ञानविजृम्भणात् -

आह नित्यपरोक्षं तु तच्छब्दो ह्यविशेषि
तः त्वंशब्दश्चापरोक्षार्थं तयोरैक्यं क
थं भवेत् - आदित्यो यूप इतिवत्साद
श्यार्थौ तु सा श्रुतिरिति

तथा च परमा श्रुतिः जीवस्य परमैक्यं च बुद्धि
सारूप्यमेव वा - एकस्थाननिवेशो वा व्य
क्तिस्थानमपेक्ष्य वा ॥ न स्वरूपैकता तस्य
मुक्तस्यापि विरूपतः - स्वातन्त्र्यपूर्णतेऽ
ल्पत्वपारतन्त्र्ये विरूपतेति -
अथवा स एव तत्त्वमसि इत्यत्र स एवात्मा स्वा
तन्त्र्यादिगुणोपेतत्वात् अतत्त्वमसि त्वं त
न्न भवसि तद्रहितत्वादित्येकत्वमतिशयेन
निराकृतम् तदाह अतत्त्वमिति निवाच्छेद

25
२५

त्तेनैक्यं श्रुतिरुक्तमिति दृष्टान्तनवकेऽपि सर्व
थाश्रुतिः स्थूलेण वृक्ष इत्यादिना भेदस्यैव दृष्टा
न्ताभिधानाय प्रयत्नभेदोपदेशादिति न च वाद
रहस्यम् तथा च महोपनिषत्

यथा पक्षी च सूत्रं च नानावृक्षरसा य
था - यथा नद्यः समुद्राश्च शुद्धोदलव
णे यथा ॥ चोरापहार्यौ च यथा यथा पुं
विषयावपि । तथा जीवेश्वरौ भिन्नौ स
र्वदैव विलक्षणौ ॥ तथापि सूक्ष्मरूप
त्वान्न जीवात्परमो हरिः । भेदेन मन्ददृ
ष्टीनां दृश्यते प्रेरकोऽपि सन् ॥ वैलक्ष
ण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथेति ।
ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणा
त्मकाः । लक्ष्मीरक्षरदेहत्वादक्षरा
तः परो हरिः ॥ स्वातन्त्र्यशक्तिविज्ञा
नसुखाद्यैरखिलैर्गुणैः । निःसीमत्वे
न ते सर्वे तद्वशाः सर्वदैव च ॥ इति
विद्युत्सर्वगुणैः पूर्णं ज्ञात्वा संसारव
र्जिताः । निर्दुःखानन्दभुक्नित्यं तत्समी
पे समोदते ॥ मुक्तानां चाश्रयो विष्णु
रधिकाधिपतिस्तथा । तद्वशा एव
ते सर्वे सर्वदैव स ईश्वर इति च ॥
एकविज्ञानेन सर्वविज्ञानस्य प्रधानैककारणत्वा च
दिना युज्यते न तु सर्वं मिथ्यात्वेन न हि सतो

96
२६

ज्ञानेन मिथ्याज्ञानं सम्भवति यथाव्यधालक्षणं
ज्ञानाज्ञानाभ्यां ब्राह्मो ज्ञातः अज्ञात इत्येवमादिव्यप
देशो दृश्यते यथा च कारणे विज्ञाते ज्ञाते ज्ञा
नान्यस्य प्रत्रमिति अन्यथा सोऽयेकेन मृत्पि
ण्डेन सर्वं मृण्मयं विज्ञातमित्यत्र एकपिण्ड
शब्दो यथा प्रसज्येयातां तदा विज्ञानयेत्ये
तावतैव वाक्यस्य पूर्णत्वात् नच वाचारम्भ
णं विकारो नामधेयं मृत्तिकेत्येव सत्यमि
त्येतत्कार्यस्य मिथ्यात्वमाचष्टे इत्येष्टव्य
म् वाचारम्भणं विकारो यस्य तत् अवि
कृतं नित्यं नामधेयं मृत्तिकेत्यादिकमि
त्येतद्वचनं सत्यमेवेति तथ्यस्य स्वीकारात्
अपरथा नामधेयमेवेति पादयोर्वैयर्थ्यं प्रसज्ये
त अतो न कुत्रापि जगतो मिथ्यात्वसिद्धिः किञ्च
त्वपक्षोऽपि विध्येत्यत्र मिथ्यात्वं तथ्यमतथ्यं वा
प्रथमे सत्याद्वैतभङ्गप्रसङ्गः चरमे त्वपक्षसत्य
त्वापातः नच मिथ्यात्वं नित्यमनित्यं वा उभय
थाप्यनुपपत्तिरित्याक्षेपवदयमपि नित्यसम
जातिभेदः स्यादिति तदुक्तं न्यायनिर्वाणवेध
सा- नित्यमनित्यभावादनित्ये नित्यत्वोपपत्ते
र्नित्यसम इति तार्किकरक्षायां च

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः
धर्मिणस्तद्विशिष्टत्वभङ्गो भवेदिति

नित्यसमो X

अस्याः संज्ञाया उपलक्षणत्वमभिप्रेत्याभिहि

27

२६

तं प्रबोधसिद्धौ अन्वयित्वात् परमुक्तधर्मस्य
मेति तस्मादस्तुतरमेतदिति चेत् अशिक्षि
तत्रासत्वमेतत् दुष्टत्वमूलानिरूपणात् त
द्विविधम् साधारणमसाधारणञ्च तत्राद्यं
स्वव्याघातकम् द्वितीयं त्रिविधम् युक्ताङ्ग
हीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्व
ञ्चेति - तत्र साधारणमसम्भावितमेव उक्त
स्यात्तेषस्य स्वात्मव्याघातानुपलम्भात् एवम
साधारणमपि घटस्य नास्तितायां नास्ति
तोक्तावस्तित्ववत् वकृतेरुपपत्तेः नत्वत्र
पक्षस्य मिथ्यात्वमभ्युपेयते नासत्त्वमिति
त चेत्तदेतत् [illegible] सोऽयं शिरश्छेदेपि शतं न द
दाति विंशतिपञ्चकं तु प्रयच्छतीति ग्रा
कटिकवृत्तान्तमनुहरेत् मिथ्यात्वासत्त्वयोः
पर्यायत्वादित्यलमतिप्रपञ्चेन ।
अथातो ब्रह्मजिज्ञासा अत्र अतःशब्दो हेत्वर्थकः
गारुडात् स तद्यथा आनन्तर्याधिकारे च मङ्ग
लार्थे तथैव च अथशब्दस्त्वतःशब्दो हेत्वर्थे स
मुदीरितः - यतो नारायणप्रसादमन्तरेण न
मोक्षो लभ्यते प्रसादश्च न ज्ञानमन्तरेण अ
तो ब्रह्मणः नारायणस्य जिज्ञासा कर्त्तव्येति शे स्य
रत्नह्रै षः - जिज्ञास्ये [illegible] जन्माद्यस्य यतः २
तथापवर्गादे उत्पत्तिस्थितिसंहारा नि
यतिर्ज्ञानमावृत्तिः बंधमोक्षौ च पु
ध्यस्मात्स हरिरेकराट् २

२४

२८

यतो वाच इमानीति श्रुतिश्च २
तत्र प्रमाणम् शास्त्रयोनित्वात्
नावेदविन्मनुते तं बृहन्तं - तन्त्वौपनिषदं पुरु
षं पृच्छामीत्यादि श्रुतिभ्यस्तस्यानुमानि
कत्वं निराक्रियते न चानुमानस्य स्वातन्त्र्ये
ण प्रामाण्यमस्ति तदुक्तं कौर्मे -
श्रुतिसाहाय्यरहितमनुमानं न कुत्र
चित् निश्चयात्साधयेदर्थं प्रमाणा
न्तरमेव च २ श्रुतिस्मृतिसहायं य
त्प्रमाणान्तरमुत्तमम् प्रमाणप
दवीं गच्छेन्नात्र कार्या विचारणा २
शास्त्रस्वरूपं स्कान्दे - ऋग्यजुः सामाथर्वा
च भारतं पाञ्चरात्रकम् मूलरामा
यणं चैव शास्त्रमित्यभिधीयते २
यच्चानुकूलमेतस्य तच्च शास्त्रं प्र
कीर्तितम् अतोऽन्यो ग्रन्थविस्तारो
नैव शास्त्रं कुवर्त्म तत् २
तदनेनानन्यलभ्यः शब्दार्थ इति न्यायेन
भेदस्याज्ञातत्वेन तत्र न तात्पर्यं किन्त्वद्वै
त एव वेदवाक्यानां तात्पर्यमित्यद्वैतं ब्रह्मा
प्राप्तिरित्यपि अनुमानादीनां स्वसिद्धय
भावेन तद्भेदस्यापि नतः सिद्धभावात्
तस्मात्तु भेदानुवादकत्वमिति तत्स्वरत्वम
वगम्यते अत एवोक्तम् सदागमैकविरो

२१
२८

यं समभीतकृराक्षरम् नारायणं सदा वन्दे निर्दे
षाशेषसङ्कराम् -
शास्त्रस्यानन्तप्रामोध्य्यम् प्रपादितं तत्तु सम
न्वयात् ४ समन्वयः उपक्रमादिलिङ्गम्
भगवद्गीता अ० २ श्लोक १२
नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः नचैव न भ
विष्यामः सर्वे वयमतः परम् १२
अत्रेदं भगवतस्तात्पर्यम् यथाहं सर्वेश्वरः परमा
त्मा नित्य इति नात्र संशयस्तथैव भवन्तोः क्षेत्रज्ञा
आत्मानो पि नित्या एवेति मन्तव्याः एवं भगवतः
सर्वेश्वराद् आत्मनां परस्परं च भेदः पारमार्थिक इति
भगवतैवोक्तम् इति प्रतीयते अज्ञानमोहितं प्र
ति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये
त्वमिमे सर्वे वयमिति व्यपदेशात् - औपाधि
कभेदवादे त्वात्मभेदस्याताात्त्विकत्वेन तत्त्वोप
देशसमये भेदनिर्देशो न सङ्गच्छते आत्मभे
दस्य स्वाभाविकत्वे श्रुतिरपि नित्यो नित्यानां
चेतनश्चेतनानामेको बहूनां विदधाति कामान्यो
निति अज्ञानकृतभेददृष्टिवादे तु परमपुरु नित्य
षस्य परमार्थदृष्टेर्निर्विशेषकूटस्थचैतन्या
त्मयाथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्का
र्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदे
शादि व्यवहाराश्च न सङ्गच्छन्ते - परमपु
रुषोपायत इति पदेऽर्जुनवाक्यात्परमपु

30

३०

रूपवाक्यस्याज्ञानमूलत्वमिथ्यार्थत्वेविशेषाभावा
त्तस्योपदेशरूपत्वेन – अथपरमगुरूपस्याधि
गताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं
दग्धपटादिवन्नबन्धकमित्युच्येतेतिचेन्नैतदुप
पद्यते मरीचिकाजलज्ञानादिकं हि बाधितमनुवर्त्त
मानमपि नजलाहरणादिप्रवृत्तिहेतुः एवमत्रा
प्यद्वैतज्ञानेनबाधितंभेदज्ञानमनुवर्त्तमानंमि
थ्यार्थत्वनिश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भव
ति नचेश्वरस्यपूर्वमज्ञस्यशास्त्राधिगतेनैव
ज्ञानतयाबाधितानुवृत्तिर्वक्तुं शक्यते कस्य
चक्षुनि यः सर्वज्ञः सर्ववित् – परास्यशक्ति
र्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रिया
च वेदाहं समतीतानि सम वर्त्तमानानि चार्जु
न-भविष्याणि च भूतानि मांतुवेद नकश्चने
ति श्रुतिस्मृतिविरोधात् –
किञ्च परमगुरूपस्येदानीतनगुरूपरम्परा
चाद्वितीयात्मस्वरूपनिश्चयेसति अनुवर्त्त
मानेपिभेदज्ञानेस्वनिश्चयानुरूपमद्वितीय
मात्मज्ञानकस्माडुपदिशतीतिवक्तव्यम्प्र
५ तिबिम्बवत्प्रतीयमानेभ्योऽर्जुनादिभ्य इतिचे
न्नैतदुपपद्यते नत्वन्ततः कोपि मणिकृपाण
दर्पणादिषुप्रतीयमानेषु स्वात्मप्रतिबिम्बेषु ते
षां स्वात्मनोऽन्यत्वं जानन् तेभ्यः किमप्यर्थमु
पदिशति बाधितानुवृत्तिरपि नैवशक्यते
वक्तुं बाधकेनाद्वितीयात्मज्ञानेनात्मव्यति

31
३२

रिक्त भेदज्ञानकारणस्याज्ञानादेरज्ञानस्य विनष्टत्वा
त्- द्विचन्द्रज्ञानादौ तु चन्द्रैकत्वज्ञानेन पारमार्थि
कतिमिरादिदोषस्य द्विचन्द्रज्ञानहेतोरविनष्ट
त्वाद् बाधितानुवृत्तिर्युक्ता- अनुवर्तमानमपिद्वि
त्वत्वप्रमाणबाधितत्वेनाकिञ्चित्करं इह तु भेद
ज्ञानस्य सविषयस्य सकारणस्य पारमार्थिक
त्वेन वास्तुयाथात्म्यज्ञानविनष्टत्वान्न कथंचि
दपि बाधितानुवृत्तिः सम्भवतीति अतः सर्वे
श्वरस्येदानीन्तनगुरुपरम्परया अत्र तत्त्वज्ञान
मस्ति चेद् दर्शनकार्योपदेशाद्यसम्भवः
भेददर्शनमस्तीति चेत् अज्ञानस्य तद्धेतोः
स्थितत्वेनाज्ञत्वादेव सुतरामुपदेशो न सम्भ
वति किञ्च गुरोरद्वितीयात्मविज्ञानादेव
ब्रह्माज्ञानस्य सकार्यस्य विनष्टत्वाच्छिष्यं प्र
त्युपदेशो निष्प्रयोजनः गुरुत्वज्ञानं च कल्पि
तमिति चेच्छिष्यतज्ज्ञानयोरपि कल्पितत्वा
त्तदप्यनिवर्तकं कल्पितत्वेऽपि पूर्वविरोधि
त्वेन निवर्तकमिति चेत्तदाचार्यज्ञानेऽपि स
मानमिति तदेव निवर्तकं भवतीत्युपदेशान
र्थक्यमेवेति कृतमसमीचीनवादैर्निरासः-

यत्तु केचिद्याचक्षते अतीतेषु देहोत्पत्ति
विनाशेषु घटादिषु वियदिव नित्यमेवाहमा
समित्यभिप्रायः वज्रकवचं देहभेदानुवृत्त्याना

39

३२

त्मभेदाभिप्रायेणेति एतेषां निरसनमवच्छिन्नवाद
निरसने करिष्यते -
ननु क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत इत्यत्र क्षेत्र
ज्ञं चापि मां विद्धीति सामानाधिकरण्येनैकात्म्यमवगम्य
ते ततश्चेश्वरस्यैव सतोऽज्ञानात्क्षेत्रज्ञत्वमिव भवतीत्य
भ्युपगन्तव्यं तन्निवृत्त्यर्थश्चायमैकात्म्योपदेशः अनेन
चाप्यनेन मम भगवदुपदेशेन रज्जुरियं न सर्प इत्याद्युपदेशे
न सर्पत्वभ्रमनिवृत्तिवत्क्षेत्रज्ञत्वधर्मो निवर्तत इति
केचिद्वदन्ति अतः कोऽयमीश्वरजीवभेद इति चे
त्पृष्टव्याः अयमुपदेष्टा भगवान्वासुदेवः किमा
त्मयाथात्म्यसाक्षात्कारेण निवृत्ताज्ञानः उत न । ना
द्यः निर्विशेषचिन्मात्रैकस्वरूपज्ञानमत्यन्तदू
पाध्यासासम्भावनया कौन्तेयादिभेददर्शनमानू
श्रुत्युपदेशादिव्यापारश्च न सम्भवति - न द्विती
यः अज्ञत्वादेवात्मज्ञानोपदेशारम्भासम्भवा
त् उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्युक्तम्
अत एवमादिवादा अनाकलितश्रुतिस्मृतीति
हासपुराणन्यायसदाचारस्ववाक्यविरोधिभिः
स्ववचःस्थापनदुराग्रहैरज्ञानिभिर्जगन्मोहना
य प्रवर्तिता इत्यनादरणीयाः अत्रेदं तत्त्वम्
देवमनुष्यादिसर्वदेहेषु वेदितृत्वैकाकारं क्षेत्रज्ञं
चकारात्क्षेत्रमपि मां मदात्मकं विद्धि क्षेत्रं क्षेत्रज्ञ यथा
विशेषणतैकस्वभावतया तदपृथक्सिद्धेस्तत्सा
मानाधिकरण्येनैव निर्दिष्टं यथा क्षेत्रक्षेत्रज्ञ
वमपि विशेषणतैकस्वभावतया मदपृथक्सिद्धे

33
३३

र्मसामानाधिकरण्येनैव निर्दिष्टो विद्धि व
द्यति चेत्रज्ञात् क्षेत्रज्ञांश्च व्यक्तजो भयावस्था
न्तरादक्षरशब्दनिर्दिष्टाद्यान्तरं च परस्य
ब्रह्मणो वासुदेवस्य - द्वाविमौ पुरुषौ लो
के क्षरश्चाक्षर एव च - क्षरः सर्वाणि भूता
नि कूटस्थोऽक्षर उच्यते - उत्तमः पुरुष
स्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रय
माविश्य बिभर्त्यव्यय ईश्वरः - यस्मा
त्क्षरमतीतोऽहमक्षरादपि चोत्तमः अ
तोऽस्मि वेदे लोके च प्रथितः पुरुषोत्तम इति
गीता - अ. १५ श्लो. १६।१७।१८
अत्र क्षरशब्दनिर्दिष्टः पुरुषो जीवशब्दाभि
लपनीयब्रह्मादिस्तम्बपर्यन्तः क्षरणस्वभावाचि
त्संसृष्टः सर्वभूतानि अचिच्चित्संसर्गरूपैकोपाधि
ना पुरुष इत्येकत्वनिर्देशः अक्षरशब्दनिर्दिष्टः
कूटस्थः अचित्संसर्गवियुक्तः स्वेन रूपेणाव
स्थितो मुक्तात्मा स च चित्संसर्गाभावादचित्परि
णामविशेषब्रह्मादिदेहसाधारणो न भवती
ति कूटस्थ इत्युच्यते अत्राप्येकत्वनिर्देशो विवि
योगरूपैकोपाधिनाभिहितः न हीतः पूर्वमना
दौ काले मुक्ताः एवेति यत उक्तम् वक्त्वो ज्ञानप
साधूनामद्भावमागताः - इदं ज्ञानमुपाश्रित्य

34

३४ स्पविद्दसो रित्यादो इति

[illegible]

नमस्याधर्म्यमागताः समेविनोपजायुनेपूजयेन
व्यथन्ति च - पञ्चकोशविदेशानिबुद्धेरुक्तं उरुब
इत्यनेन राशिरुच्यते तत्र विनाश्यको राशिः अपरः
अक्षरः भगवतो मायाशक्तिः क्षरराशेरुत्पत्तिबी
जमनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयो
ऽक्षरराशिः - कूटो राशिः तद्वत् स्थितः - अ
थवा कूटं मायावञ्चना जिह्मत्वं कुटिलतावेतिप
र्यायाः अनेकमायावञ्चनादिप्रकारेण स्थितः
कूटस्थः संसारबीजभावेनानन्त्यान्नक्षरतीत्यक्षर उ
च्यते - अन्ये तु श्रीधरस्वाम्यादिभिः कूट इव रा
शिलारा शिरिव पर्वत इव देहेषु नश्यत्स्वपि निर्विकारित
शि याति(ष्ठ)तीति कूटस्थश्चेतनो भोक्ता सत्वक्षरः पुरु
ष उच्यते बुधैः एवं व्याख्यातम् एतत्त्वगोत्रकल्पना
देव निरस्तम् - पुरुषशब्दस्य राशिपर्यायत्वेऽभा प्रमाणाx
वात् अस्मिन्श्लोके उत्तमः पुरुषस्त्वन्य इत्यस्य
प्रकरणे उत्तमराशिरित्यर्थः स्यात् सोऽसमीचीनः मधुसूदन
त्वारसा परमात्मनः राशिरूपत्वाभावात् सर्वथा ... स्वामिनातरा
चो x सकायमिति निमंत्रे कायमिति पदेनाराशिरूप सं व चेतन
त्वनिरूपणात् - तथाहि पाणिनीयसूत्रम् निवा राशिः जड
धा सचितिशरीरोपसमाधानेष्वादेश्च कः ३।३।४१ अ राशिभ्यां
स्यार्थः एषु चिनोतेर्घञ् आदेश्च कः - उपसमाधानं विलक्षण
राशीकरणम् तच्च धात्वर्थः अन्ये प्रत्ययार्थस्य इत्युक्तम् x
कारकस्योपाधिभूताः - निवासे काशीनिकायः
चितौ आकायमग्निं चिन्वीत - शरीरे चीयते

स्मिन्नस्यादिकमिति निकायः समूहे गोमयनिका
यः राशिः किम् चयः चः कश्चिविक्तव्ये आदेरिच्
त्रेर्यङ्लुक्यादेरेवयथास्यादिति गोमयानांनि
केचायः पुनः पुनः राशीकरणमित्यर्थः -
प्रत्ययस्तु आचीयन्तेस्मिन्निष्टका इत्याकायम्
अधिकरणे घञ् अग्निस्थलविशेषचिन्वीत च
यनेननिष्पादयेदित्यर्थः -
द्वितीयश्लोकस्यायं संक्षिप्तोर्थः तराक्षरशब्दनिर्दि
ष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः अर्थान्तरभूतः
परमात्मेति श्रुतिस्मृतिषूक्तः कथं लोक्यत इति लो
कः तत्त्रयं अचेतनं तत्संसृष्टचेतनो मुक्तश्चेति प्रमा
णावगम्यं यत्तत्त्रयं य आत्मतयाविश्य बिभर्ति स
तस्माद्व्याप्यादर्थान्तरभूतः यतः सोव्य
यईश्वरश्च अव्ययस्वभावो हि व्ययस्वभावादचे
तनात् तत्सम्बन्धेन तदनुसारिणश्चेतनात्-
अचित्सम्बन्धयोग्यतया पूर्वसम्बंधिनो मुक्ताच्चा
र्थान्तरभूत एव - ईशितव्यादस्मात् लोकत्रयादर्था
न्तरभूतः ईश्वरः एतेन भूर्भुवः स्वराख्यलोक
त्रयं आविश्य बिभर्तीति वेदान्तिभुवोक्तं निरस्तम्
य आत्मनि तिष्ठन्नित्यादिश्रुतिभिर्बद्धमुक्तात्मनाम
प्यन्तःप्रवेशस्य निरूपणात् -
तृतीयश्लोके लोक इति वेदार्थावलोकनात्स्मृतिरि
होच्यते श्रुतौ तावत् परं ज्योतिरुपसम्पद्य स्वेन रू
पेणाभिनिष्पद्यते स उत्तमः पुरुष इत्यादौ स्मृतौ
च अंशावतारं पुरुषोत्तमस्य त्वनादिमध्यांतमजं

सविशेषोरित्यादौ – पृथिव्यादिसङ्घातरूपवस्तुदे
वस्य च भगवच्छरीरतैकस्वभावस्वरूपतया भ
गवदात्मत्वं श्रुतयो वदन्ति यः पृथिव्यां तिष्ठन्
पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी श
रीरं यः पृथिवीमन्तरो यमयति स त आत्मा
न्तर्याम्यमृत इत्यारभ्य य आत्मनि तिष्ठन्नात्म
नोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आ
त्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृ
त इत्याद्याः इदमेवान्तर्यामितया सर्वदेव
तानामात्मत्वेनावस्थानं भगवत्सामानाधि
करण्येन व्यपदेशहेतुः – अहमात्मा गुडाके
श सर्वभूताशयस्थितः – न तदस्ति विना यत्स्या
न्मया भूतं चराचरम् – विष्टभ्याहमिदं कृ
त्स्नमेकांशेन स्थितो जगत् – इति प्रस्तुत्य
विशेषांश्चाभिधाय मध्ये सामानाधिकरण्येन
व्यपदिशति आदित्यानामहं विष्णुरित्या
दिना यदिदं देवदेवप्रयोर्विवेकविषयत
योर्भेदात्मकत्वविषयं च ज्ञानं तत्त्वज्ञानं देवो
पादेयं ज्ञानमिति मे मतम् –
अत्रेदं तत्त्वम् अचिद्वस्तुनश्चिद्वस्तुनः परस्य ब्र
ह्मणो भोग्यत्वेन भोक्तृत्वेनेशितृत्वेन च स्वरूप
विवेकमाहुः काश्चन श्रुतयः – अस्मान्मायी
सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरु
द्धः – मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्

यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुः यस्य सर्वा
णि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति एष त आत्मा सर्वान्त
र्याम्यमृत इति ५६

37
३९

- क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः
- अमृताक्षरं हर इति भोक्ता निर्दिश्यते प्रधानं भोग्यत्वेन हरतीति हरः -
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः - प्रधानक्षेत्रज्ञपतिर्गुणेशः - पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् - ज्ञाज्ञौ द्वावजावीशानीशौ - नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् - भोक्ता भोग्यं प्रेरितारं च मत्वा पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति - तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति - अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः - गौरनाद्यन्तवती सा जनित्री भूतभाविनी समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्याद्याः

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् क. व. मं.

गीतायामपि "अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा" अ॰ ७ श्लो॰ ४
"अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् - जीवभूतां महाबाहो ययेदं धार्यते जगत् - ७।५
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् - कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् - अ॰ ९ श्लो॰ ७
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः - ~~अ॰ श्लो॰~~
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् - अ॰ ९ श्लो॰ ८
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ४

हेतुनानेन कौन्तेय जगद्विपरिवर्तते अ॰ ९ श्लो॰ १०
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि- अ॰ १३ श्लो॰ १९
मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् संभवः
सर्वभूतानां ततो भवति भारत- अ॰ १४ श्लो॰ ३ मम
अस्यार्थः कृत्स्नस्य जगतो योनिभूतं यन्महद्ब्रह्म
तस्मिन्भूमिरापइत्यादिना निर्दिष्टेऽपरप्रकृत्याख्ये
ऽचेतने इतस्त्वन्यौदिवाक्येन निर्दिष्टं चेतनपुंजरू
भित्या पं परप्रकृतिं गर्भ[redacted] गर्भशब्देनोक्तं दधामि अ-
चेतनप्रकृत्या भोगक्षेत्रभूतया भोक्तृवर्गपुञ्जभूतां
चेतनां प्रकृतिं संयोजयामीत्यर्थः ततः तस्मात्प्र
त्रिदधि कृतिद्वयसंयोगात् मत्संकल्पकृतात्सर्वभूतानां
त्संसर्गा ब्रह्मादिस्तम्बपर्यन्तानां संभवो भवति- श्रुताव पचित्रि स्मारणा
पि कश्चित्प्रकृतिरपि ब्रह्मेति निर्दिश्यते- यः सर्वज्ञः
सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरू
पमन्नं च जायत इति- अतएव भागवते नवटल
उद्भवः प्रकृतिपूरुषयोर्न्नयोस्सम्भवयुतान्भव
न्ति सुमतोजलबुद्बुदवदित्यादि श्रुतयोपि यः
पृथिव्यां तिष्ठन्नित्यारभ्य य आत्मनि तिष्ठन्नित्या ति
दयः तथा यः पृथिवीमन्तरे संचरन्यस्य पृथि
वीशरीरं यं पृथिवी न वेदेत्यारभ्य योऽक्षरमन्त
रे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेद-
यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरं यं मृत्यु
र्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो
देव एको नारायणः अत्र मृत्युशब्देन तमः शब्द

39

३८

३८

विज्ञानं च सत्यं चानृतं च सत्यमभवदिति च अनेन
जीवेनात्मनानुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं
तदनुप्रविश्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं
चेत्यनेनैकार्थ्यादात्मशरीरभावनिबंधनमि
ति विज्ञायते एवं भूतं च नामरूपव्याकरणं त
...जीवास्यता। पदाचत्व सशरीरं नयति
देवं प्रकारः परमपुरुष एव कार्यावस्थकारणाव
स्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं का
रणश्रुतयः कार्यावस्थकारणावस्थं जगत्सर
वेत्याहुः यथा सदेव सोम्येदमग्र आसीदेकमे
वाद्वितीयं ब्रह्म तदैक्षत बहु स्यां प्रजायेयेति
अन्तःप्रविष्टः तत्तेजोऽसृजत इत्यारभ्य
सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः
सत्प्रतिष्ठाः - ऐतदात्म्यमिदं सर्वं - तत्सत्यं
स आत्मा तत्त्वमसि श्वेतकेतो इति तथा सो
ऽकामयत बहु स्यां प्रजायेयेति - स तपोऽतप्य
त स तपस्तप्त्वा इदं सर्वमसृजत इत्यारभ्य
सत्यं चानृतं च सत्यमभवत् इत्यत्रापि श्रुत्य
न्तरसिद्धचिदचितोः परमपुरुषस्य च स्वरू
पविवेकः स्मारितः - हन्ताहमिमास्तिस्रो दे
वता अनेन जीवेनात्मनानुप्रविश्य नामरू
पे व्याकरवाणि तत्सृष्ट्वा तदेवानुप्राविशत्
तदनुप्रविश्य सच्च त्यच्चाभवत् - विज्ञानं चा

39

३९

40

विज्ञानंचसत्यंचानृतंचसत्यमभवदितिच अनेन
जीवेनात्मनानुप्रविश्येतिजीवस्यब्रह्मात्मकत्वं
तदनुप्रविश्यसच्चत्यच्चाभवत् विज्ञानंचाविज्ञानं
चेत्यनेनैकार्थ्यादात्मशरीरभावनिबंधनमि
तिविज्ञायते एवंभूतंयन्नामरूपव्याकरणं त
द्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रि
यतेत्यत्रचोक्तम् अतः कार्यावस्थः कारणावस्थ
श्चस्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुषए
वेतिकारणात्कार्यस्यानन्यत्वेनकारणविज्ञानेन
कार्यस्यज्ञाततयाएकविज्ञानेनसर्वविज्ञानंचस
मभिहितमुपपन्नतरम् हन्ताहमिमास्तिस्रोदे
वताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्या
करवाणीति तिस्रोदेवताइतिसर्वमचिद्वस्तुनि
र्दिश्यतत्रस्वात्मकजीवानुप्रवेशेननामरूपव्या
करणवचनात् सर्वेवाचकाःशब्दाः अचिज्जी
वविशिष्टपरमात्मनएववाचकाइति कारणा
वस्थपरमात्मवाचिनाशब्देनकार्यवाचिनःशब्द
स्यसामानाधिकरण्यमुख्यवृत्तं अतःस्थूलसू
क्ष्मचिदचित्प्रकारंब्रह्मैवकार्यंकारणंचेति ब्र
ह्मोपादानंजगत् सूक्ष्मचिदचिद्वस्तुशरीरंब्रह्मै
वकारणमिति जगतोब्रह्मोपादानत्वेपिसंसृष्ट
स्योपादानत्वेनचिदचितोर्ब्रह्मणश्चस्वभावासंक
रोप्युपपन्नतरः यथाशुक्लकृष्णरक्ततन्तुसंघा
तोपादानत्वेपिविचित्रपटस्यतत्तत्तन्तुप्रदेशएव

41
४१

शोकादिसंयोग इति कार्यावस्थायामपि कारण
वत्सर्वत्र चासङ्करः तथा चिदचिदीश्वरसंघातोपा
दानत्वेपि जगतः कार्यावस्थायामपि भोक्तृत्वभो
ग्यत्वनियन्तृत्वनियम्यत्वाद्यसंकरः तन्तूनां
पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदा
चित्संगतानां कारणत्वं कार्यत्वं च इह तु चिद
चितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत
त्प्रकारतैकपदार्थत्वात्तत्प्रकारः परमपुरुष
एव कारणं कार्यं च स एव सर्वदा सर्वशब्दवाच्य
इति विशेषः स्वभावभेदस्तदसंकरश्च तत्र चा
स त्र च तुल्यः एवं च सति परब्रह्मणः कार्यानुप्रवे
शेपि स्वरूपान्यथाभावादविकृतत्वमुपपन्नं
स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिद
चिद्वस्तुन आत्मतयावस्थानात्कार्यत्वमप्यु
पपन्नम् अवस्थान्तरापत्तिरेव हि कार्यता-
निर्गुणवादश्च परस्य ब्रह्मणो हेयगुणसम्बन्धा
दुपपद्यते - अपहतपाप्मा विजरो विमृत्युर्वि
शोको विजिघत्सोऽपिपास इति हेयगुणान्प्रति
षिध्य सत्यकामः सत्यसंकल्प इति कल्या
णगुणान्विदधतीयं श्रुतिरेव अन्यत्र सामान्येना
वगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापय
ति - ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्व
शक्तेर्निखिलहेयप्रत्यनीककल्याणगुणाक
रस्य परस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं

42
४२

स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्न
तरः - यः सर्वज्ञः सर्ववित् - परास्य शक्तिर्विविधै
व श्रूयते स्वाभाविकी ज्ञानबलक्रिया च - विज्ञा
तारमरे केन विजानीयादित्यादिका ज्ञातृत्वमा
वेदयन्ति - सत्यं ज्ञानमनन्तमित्यादिकाश्च ज्ञाने
कनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्व
रूपत्वं - सोकामयत बहु स्यां प्रजायेय - तदैक्ष
त बहु स्यां तन्नामरूपाभ्यां व्याक्रियते -
आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं वि
दितं भवति - सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं
वेद - तस्य ह वा एतस्य महतो भूतस्य निःश्वसित
मेतद्यदृग्वेद इति - ब्रह्मैव स्वसंकल्पाद्विचित्र
स्थिरचरस्वरूपतया नानाप्रकारमवस्थितमि
ति तत्प्रत्यनीकाब्रह्मात्मकवस्तुनानात्वमतत्त्व
मिति प्रतिषिध्यते - मृत्योः स मृत्युमाप्नोति य
इह नानेव पश्यति - नेह नानास्ति किञ्चन -
यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति -
यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्या
दिना न पुनर्बहु स्यां प्रजायेयेति श्रुतिसिद्धस्वसंक
ल्पकृतं ब्रह्मणो नानानामरूपभोक्तृत्वेन नानाप्र
कारत्वमपि निषिध्यते - यत्र त्वस्य सर्वमात्मैवाभू
दिति निषेधवाक्यारम्भे च तत्स्थापितं - तस्य ह
वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इ
त्यादिना एवं चिदचिदीश्वराणां स्वरूपभेदं स्वभा

५५

४[illegible]

व भेदं च वदन्तीनां तासां कार्यकारणभावं कार्यकार
णयोरन्यत्वं वदन्तीनां च सर्वासां श्रुतीनामविरोधः
श्रुतिभिरेव ज्ञायत इति ब्रह्मज्ञानवादस्य श्रेयोपा-
धिकब्रह्मभेदवादस्याप्यन्यस्यान्यायमूलकस्य
सकलश्रुतिविरुद्धस्य न कथंचिदवकाशो विद्य
त इत्यलमतिविस्तरेण-

एकमेवाद्वितीयमिति श्रुतौ ब्रह्मणोऽद्वितीयत्वेन स
जातीयः पुरुषः प्रतिषिध्यते यथा खल्वस्मिन्ग्रा
मेऽयमेक एवाऽद्वितीयः पुरुषः ऽत्र शौर्य्यौ
दार्यादिना सजातीयः पुरुषः प्रतिषिध्यते
न तु तद्व्यतिरिक्तं समस्तं वस्तु तस्य खल्वनन्त
तत्प्रमाणोपनीततयाऽशक्यनिषेधत्वात्-

सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतावनन्तश
ब्दस्य प्रागुत्तरकालिकात्यन्ताभावपरत्वा
न्न वस्तुपरिच्छेदाभावस्यान्योन्याभावाधि
करणत्वानधिकरणत्वरूपस्य लोकेऽप्रसि
द्धत्वात् तत्रागृहीतसङ्गतिकत्वात् कालपरि
च्छेदाभावमाकाशादौ प्रसिद्धमभिधत्तेऽनन्त
पदम्-

नेह नानास्ति किंचनेत्यत्रेदं वदाव इत्येका
रणे ब्रह्मणि नानात्वनिषेधः न नाना ब्रह्मेति कि
न्त्वेकमिति स्याद् ब्रह्मव्यतिरिक्तं स्यान्न किमपि
यानमिति-

... सिध्यति -- निष्फलः - एको ह वै नारायण आसीन्न ब्रह्मा
नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नाग्निर्न सोमो न सूर्यः स एका
की न रमते ...

उपदिश्यते समुक्त्याभिज्ञायो भगवता भागवते एकादशे एको नाराय
णो देवः पूर्वसृष्टं स्वमायया संहृत्य कालकलया कल्पान्त इदमीश्व
रः एकमेवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः कालेनात्मानुभा
४५ वेन साम्यं नीतासु शक्तिषु सत्त्वादिष्वादिपुरुषः प्रधानपु
रुषेश्वरः परावराणां परम आस्ते कैवल्यसंज्ञक इत्यत्राखिला
श्रयस्यैवाद्वितीयत्वनिर्देशेन विशिष्टस्यैवाद्वितीयत्वं स्फु
टतयासिद्धं प्रकृतिर्योमयाख्याता व्यक्ताव्यक्तस्वरूपिणी
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि । परमात्मा च
सर्वेषामाधारः पुरुषोत्तमः स विष्णुनामा वेदेषु वेदान्ते
षु च गीयते - ~~[illegible]~~ श्वेताश्वतरोपनिष
द्यपि सूक्ष्मचिदचिद्विशिष्टस्यैव परमात्मनः परमका
रणत्वं निर्णीतम् ब्रह्मवादिनो वदन्तीत्यादिना ते ध्या
नयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्नि
गूढाम् यः कारणानि निखिलानि कालात्मयुक्ता
न्यधितिष्ठत्येक इत्यन्तेन -
यदानुयत्पूर्वकृतानि विद्यन्त्स्वहि सद्भावस्त्वका
लोग्रशब्दार्थः तदा सूर्याचंद्रमसौ धाता यथा
पूर्वमकल्पयदिति श्रुत्यनभिमतम् - अप
वर्जीवानां तत्कर्मप्रवाहाणां चाभावाद्देवादि
विषमसृष्टेः किंकारणमिति निरूपणीयम्
- ईश्वरेच्छैवेति चेन्न साधुकारी साधुर्भवती
त्यादिश्रुतिविरोधात् वैषम्यनैर्घृण्यप्रसक्ते
श्च नच प्रपञ्चस्य मिथ्यात्वेन न वैषम्याद
दोषप्रसक्तिरिति वाच्यम् विवर्तवादे यथो
क्ता नादिः सृजतेर्हृतेश्चेत्यादिश्रुतिविरोध
परिहाराय वैषम्यनैर्घृण्ये न सापेक्षत्वादि
ति सूत्रस्य निर्माणस्यवैयर्थ्यापत्त्या
द्विवर्तवादात् - नच सन्मात्राध्यस्तप्रपंचस्यको

द्रष्टा ब्रह्मैव नाद्यविद्यातिरोहितस्वरूपं स्व
गतं नानात्वं पश्यतीति चेन्न नित्यप्रकाशस्व
रूपैकरसप्रकाशज्ञानमात्रनिरञ्जनस्य
तिरोधानासम्भवात् प्रकाशपर्यायस्य ज्ञानस्य
तिरोधाने स्वरूपनाशप्रसङ्गः तिरोधानं ना
म वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिरु
द्धिः प्रकाश एव वस्तुस्वरूपमिति भवद्भिर
ङ्गीकृते तिरोधानाभावः स्वरूपनाशो
वा स्वीकार्यः न च स्वरूपप्रकाशस्य नित्य
त्वेपि तद्वैशिष्ट्यमात्रमविद्यातिरोहितमि
ति वाच्यम् वैशिष्ट्यस्वरूपानतिरिक्तं स्वरू रि
पातिरिक्तं वा आद्ये पूर्वोक्तदोषस्य तादव
स्थ्यात् द्वितीये सविशेषत्वप्रसङ्गात् ना
पि निर्विशेषप्रकाशमात्रस्याज्ञानसाक्षि
त्वमहंकारादिजगद्भ्रमश्चोपपद्यते सा
क्षित्वभ्रमादयो ज्ञातृविशेषगता दृष्टा न ज्ञ
प्तिमात्रगता इति किञ्च यदि ब्रह्मैव ना
द्यविद्यावशात्स्वगतं नानात्वं पश्यति त
र्हि प्रलयकाले विद्यमानेप्यज्ञाने प्रपञ्चा
दर्शने किं कारणमिति वद अन्यच्च
ब्रह्माज्ञानपक्षे स्वाज्ञाननिवृत्त्या तस्यैव मो
क्षणात् तदविद्याकल्पितानां जीवानां मो
क्षार्थश्रवणादिप्रयत्नो निष्फलः अवि

द्याकार्यत्वात् स्वात्मगुरुत्तर्णं प्रमतमवत् प्र
क्रिकारजनुलाभप्रयत्नवच्च मोक्षार्थप्रय
त्नोपिव्यर्थः कल्पितानाचार्य्याज्ञानज्ञानकार्य
त्वात् किञ्च एकमेवब्रह्म सर्वशरीरेषुजीव
भावमनुभवतिचेत्यादेमेवेदनाशिरसि
मेसुखमितिवत् सर्वशरीरेषुसुखदुःखप्र
तिसंधानंभवेत् जीवेश्वरवद्भुक्तशिष्या
चार्यतत्वात्त्वादिव्यवस्थानस्यात् सोभ
रिप्रभृतिषुहिआत्मैकत्वेऽनेकशरीरप्र
युक्तसुखादिप्रतिसन्धानंश्रूयते-
नचाहमर्थस्यसात्वेनतद्भेदोप्रतिसन्धा
नाभावोनात्मभेदादितिवक्तुंशक्यम् आ
त्माज्ञानेववराचाहमर्थः अन्तःकरणस्यै
भूतस्यतत्कारोजत्वात्करणत्वाच्चशरी
रेन्द्रियादिवन्नज्ञाता- विकारजननीमज्ञा
म्- एतद्योवेत्ति- नहिविज्ञातुर्विज्ञाते
र्विपरिलोपोविद्यतेविनाशित्वात्- ना
न्योतोस्तिद्रष्टा- नान्यंनायंपुरुषः-
विज्ञातारमरेकेनविजानीयात्- मोक्ष
धर्मेच अबध्यमानांप्रकृतिंबुध्यतेपंच
विंशकः नतुबध्यतिगन्धर्व प्रकृतिःपंच
विंशकम् । किञ्च अन्यत्रसततरावान्य

47

ज्ञारोप इति नियमात् न च नरविषाणादेरिव स्वरूपे
णासतः प्रपञ्चस्य न तत्र सत्त्यारोपसम्भवः दृ.
श्यते हि रज्ज्वादिषु सन्तराव सर्प्यस्यारोपः नील
नभ इत्या[illegible]गापि दृष्टानुभूतस्य सतराव नील
वर्णस्य प्रतीतिः स्वप्नेपि इह जन्मनि जन्मान्तरे
वा दृष्टस्य श्रुतस्य वा विषयस्यानुभवः अदृष्टा
दश्रुताद्वा नभाव उपजायत इति भाग. एको
भगवद्वचनात् नचारोपः स्वविषयस्य क्वचि य
त्प्रतीतिमात्रमपेक्षते न सत्त्वमपीति चे
न्न प्रतीतेरप्यसतः शशशृङ्गादेरिवासम्भ
वात् न च रज्जुसर्पप्रतीतेरिव प्रपञ्चप्रतीते
रपि दोषमात्रं कारणमपेक्षितमिति विष
यसद्भावो नापेक्षित इति चेन्न परमते दोष
रूपकारणेपि मिथ्यात्वसद्भावेन विषयप्र
तीतिरूपकार्योत्पत्तेरसम्भवात् कार्यस्य
कारणसत्तापेक्षितत्वस्य नियमात् नचा
सतोप्यारोपितसर्पस्य भयादिकार्यप्रति
कारणत्वदर्शनात्कार्यस्य कारणसत्तापे
क्षितत्वनियमो नास्तीति वाच्यम् असतः
परोक्षत्वानुकूलशक्तिमत्त्वरूपकारण
त्वासम्भवात् भ्रमस्थलेप्यारोपिताहि
विषयज्ञानस्यैव भयादिकार्यप्रति हेतु

48

त्वेन विषयस्य तत्त्वासम्भवात् कारणमा
त्रमिथ्यात्वपक्षे कार्योत्पत्तिवर्णनानुपपत्तेः
न च सतोपि सर्पादेर्ज्ञानकारणत्वोपपत्तिव
द्यकारणत्वोपपत्तिरपि किं न स्यादिति चे
न्न दोषस्यैवासदर्थावलम्बनस्तानकारण
त्वेन भ्रमस्थले विषयस्य ज्ञानकारणत्वा
नुपपत्तेः ननु घटपटादीनां व्यावहारिक
सत्यत्वमङ्गीकृतमेवेति चेन्न स्वरूपतो
मिथ्याभूतस्य शुक्तिरजतस्येव व्यवहारा
र्हत्वासंभवात् न च सतोपि त्वाद्यपदार्थस्य
स्वकालावच्छिन्नव्यवहारोपयोगित्वं दृश्य
तइति चेत्तर्हि प्रातिभासिकव्यावहारिक
सांकर्यप्रसंगः किञ्च रज्ज्वावध्यस्तानां
सर्पभूदलनजलधारादीनामसत्यत्वे यदि
भेदो वक्तुं शक्यते तदा सम्भाव्येऽध्यस्ताना
मप्ययं व्यावहारिकसत्ताकोयं च प्रातिभा
सिकसत्ताक इत्याकारकभेद उच्यतां मू-
र्वौद्धैरपि संवृतिसत्यमित्युच्यते संवृणोति
तत्त्वमिति संवृतिरविद्या तस्याः सत्यत्वमावि
द्यकसत्यत्वं व्यावहारिकसत्यत्वमिति यावत्
तद्रूपादेर्दूषितम् संवृतेर्न तु सत्यत्वसत्य
भेदः कुतोन्वेयम् सत्याचेत्संवृतिः केयं
मृषाचेत्सत्यता कथम् ॥ इदं संवृतिसदि

व्यावहारिकप्रमाणसिद्धस्येव व्यावहारिकसत्यत्वेनस्वीकारः

त्यस्यार्थः

दं परमार्थसदिति वदन्तां किं सत्यविशेषः कश्चित्सं
वृत्तिः सत्यं नाम स्वीक्रियते उतासदेव द्वितीये
सत्यशब्दोनार्थवान् प्रथमेऽप्याह सत्यभेद इति
कुतोऽयं सत्यभेदो न कुतोऽपि प्रमाणादित्यर्थः किमिति
प्रमाणाभाव इति विरुद्धत्वादित्याह सत्याचेदिति
विरुद्धत्वाज्जातिव्यक्तिभावो नास्तीत्युक्तम् इदा
नीं सदसतोः परस्परविरुद्धयोः सत्यत्वजातिस
म्बन्धोऽपि न घटत इत्याह — सत्यत्वेन च सामा
न्यं मृषार्थपरमार्थयोः विरोधान्न हि [illegible] ये
वृत्तत्वं सामान्यं वृत्तसिंहयोः २ ॥ अस्यार्थः
सत्यत्वमिति स्फुटम् नत्र दृष्टान्तः न हि वृत्तत्व
एते मिति ॥ ननु चित्सुखाचार्यैः व्यावहारिकसत्त्वं ना
म न सत्यविशेषः अपि त्वेवंविधज्ञानविषय
त्वं वस्तुतोऽसत्यस्यैव यावद्बाधं देशान्तरभावन
लौकिकवैदिकव्यवहारांगतया सत्यत्वेन व्यव
हारात् — एतदपि [illegible] — निरस्तम् स्वरूपतोऽपि
व्यापृतस्य शुक्तिरजतादेः [illegible] कादिव्यवहा
[illegible] व्यावहारिकप्रमाणेन चक्षुरादिना सि
द्धस्य व्यवहारानर्हत्वे बहुदशादेरपि तथाभूतस्य
कुण्डला दि× व्यवहारानर्हत्वप्रसंगात् ज्ञानिनो बाधितेऽपि तथा
व्यवहार [illegible] दर्शनाच्च वैदिककर्मणोऽप्यस
त्यत्वे निष्कामकर्मजन्यान्तःकरणशुद्धेरन्या
स याथात्म्यज्ञानजन्यमोक्षस्याप्यसत्त्वापत्त्या
पायोपेयभूतनिषेधवयस्य भंगः तस्मात् सर्वैरप्या
व देवस्यापि प्रामाणिकत्वं तत्र सत्कोऽनिर्मोक्ष इत्यसंगा
सोऽप्यसत्यायास्य पूर्णानन्दलाभायाशामोदकाय
मानत्वाच्च —

50

इंद्रो मायाभिः पुरुरूप ईयते इत्यत्र मायाशब्दे
न बुद्धिवृत्तयोऽभिधीयन्ते चेतश्चित्तं क्रतुर्माये
ति चित्ताभिधायकतावगमान्मायाशब्दस्य
न तदिन्द्रियद्वारकबुद्धिवृत्त्युपाधिकं भेदमा
श्रित्य बहुवचनम् - अतस्तैरुपाधिभिः प
रमेश्वरो बहुधोपास्यते - अथवा परमे
श्वरस्य स्वानेकाः क्रियाशक्तिभिर्मायाशब्द श्रुतिषु =
वाच्यैरीश्वरः अनुपासकं बहुरूपत्वमावि
र्भवति - अवतारभेदैर्वा बहुधा व्यवह्रिय
त इत्यर्थः
संसारसं सारं = मृत्योः स मृत्युमाप्नोति य इह नानेव पश्य
ती ~~[illegible] अभेदध्यानविधौ भेदद~~
~~र्शननिन्दा उदिते जुहोतीत्यादिवत्~~
ति श्रुतिर्भेदस्य मिथ्यात्वं गमयतीति नास्याः चेत
श्रुतेरतात्पर्यमप्यरूपार्थत्वात् अपि
त्वभेदध्यानविधौ तच्छेषत्वेन च भेददर्श
ननिन्दा - यथोदिते जुहोतीति विहितोदित ति
होमस्तुतयेऽनुदितहोमनिन्दा प्रातः प्रा
तरनृतं ते वदन्ति इति - अनुदितहोमस्य
विहितस्य स्तुत्यर्थमुदितहोमस्य निन्दा
- यथा तिथये बहुतायेति तद्वदत्र भेदद
र्शननिन्दया भेदप्रतिपत्तिविधिपरत्वे

न प्रपञ्चनिषेधे तात्पर्याभावः ततोऽन्यपरद
साधकाभावात् प्रत्यक्षविरुद्धोऽयमर्थो न लभ्यते-
बाधितमर्थं वेदोऽपि न बोधयतीति न्यायात्-
आगमस्य च स्वरूपावगतौ पदपदार्थविभागप्रति
पत्तौ च संगतिग्रहणे वाऽबाधितप्रत्यक्षादिसा
कारत्वात् प्रत्यक्षादेश्च स्वरूपादिप्रतिपत्तौ
शब्दप्रमाणानपेक्षत्वात् सापेक्षनिरपेक्षयो
र्निरपेक्षस्य प्राबल्यात्- आगमस्य प्रत्यक्ष
त्सागुणात्मिकानेकवृत्तिमत्तया अन्यथा
मानुपपत्त्यावन्यतमसादायाविद्यामायया
निर्वहति तथा प्रत्यक्षादेर्न्यूनत्वमिति
शब्दधर्मवतां सामतः सावकाशत्वादा
गमानां सावकाशनिरवकाशयोर्निरवका
शं बलवदिति न्यायेन प्रत्यक्षादीनां बलि
त्वात्- वस्तुतस्तु आगमस्य प्रत्यक्षादिभिर्वि
रोधशङ्कैव नास्त्यागमेष्वपरप्रपञ्चसत्यता
वगमात् तथा हि मृत्तिकेत्येव सत्यं त्रीणि
रूपाणि सत्यं प्राणा वै सत्यं सच्च त्यच्चाभव
दिति प्रपञ्चस्य सत्यत्वप्रतिपादनात्-
त्रीणि रूपाणि लोहितशुक्लकृष्णानीत्यर्थः
सदिति सन्त्रयम् त्यदिति वाय्वाकाशौ ते
अत्र च सदिति स्थूलरूपस्य वर्णनोपन्यस्त
मूर्तग्राहि प्रत्यक्षं सार्वजनीनं तत्र किं
चिद्वक्तव्यमस्ति- अनुमानमपि तत्र-

52

42

42

विवादास्पदीभूतः प्रपञ्चः सत्यः प्रमाण
सिद्धत्वादात्मवत् इति प्रपञ्चसत्यत्वे-
ऽप्यन्यमात्रस्य सत्यत्वसाधने शुक्तिरूप्य
संसर्गादौ बाधः स्यात् तेषामपरोक्षतया
बाधतयाच सदसद्विलक्षणतया मिथ्या
त्वात् तथा घटादिष्वनुगतसत्तांशे सिद्धसा
ता: धनत्वान्निवृत्तये विवादास्पदग्रहणम्
नायमसिद्धो हेतुः प्रत्यक्षेदर्शितत्वाग
वा मे चाविदितत् इदं भिन्नवस्तु सत्यं चेत्प्रमा
नम्॥ भेदस्य सत्यत्वे तु मानं यथा ऽय
ऽयं घटः एतन्निष्ठबाध्यभेदातिरि
क्तभेदाश्रयः द्रव्यत्वात्पटवत्-
भेदाश्रयस्तु उक्तकल्पितभेदमादायसिद्ध
साधनं तदर्थं बाध्यभेदातिरिक्तग्रहणम्
नावतिवा ऽप्रसिद्धविशेषणता ऽद्वैत
वादिनां सर्वभेदानां बाध्यत्वादत उक्तं
एतन्निष्ठेति पदार्थान्तरनिष्ठभेदस्यै
तन्निष्ठबाध्यभेदातिरिक्तभेदत्वेन ना
ऽप्रसिद्धविशेषणता पटे चैतन्निष्ठबा
ध्यभेदातिरिक्तत्वं भेदस्यैतन्निष्ठाति
रिक्तत्वान्न संभवति एतन्निष्ठत्वादेव
ऽप्रतो बाध्यभेदातिरिक्तसत्यभेदासिद्धिः

53

५३

द्वांतराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्म
भेदे विरूपितोस्ति शब्दान्तरेकर्मभेदः कृतानुब
न्धत्वात् १ एकस्यैवं पुनःश्रुतिरविशेषादनर्थ
कं हि स्यात् २ पृथक्त्वनिवेशात्संख्यया कर्मभेदः
स्यात् ३ संज्ञा चोत्पत्तिसंयोगात् ४ गुणश्चापूर्व
संयोगे वाक्ययोः समत्वात् ५ प्रकरणान्तरे प्र
योजनान्यत्वम् ६
धातुx शब्दान्तरं कर्मभेदेऽभ्यासो विधेः पुनःश्रुतिः
उत्पत्तिस्थाद्यादि संख्या संज्ञा चागमपूर्वगम्
चानुवादे यस्मन्धो सन्निधिः प्रक्रियान्त
र मिति शब्दानुक्रमलक्षणं विचक्षणैः २
तदेतदखिलमम्भोनिधावेव निधीयेत भेद
मिथ्यात्वे- न च तस्य लोकसिद्धभेदाभवा
देकत्वसंभवः नाऽहंकर्माऽपूर्वभेदस्य लो
कतोऽसिद्धत्वात् सिद्धत्वे च शब्दान्तराद्य
धिकरणनारम्भप्रसंगात्-
एकमेवाद्वितीयमिति श्रुतेः पूर्वोक्ते चेचित्सुखा
चार्या एवं वदन्ति अद्वितीयशब्दस्य सजातीय
वस्त्वन्तरनिषेधपरत्वेन [illegible] द्वितीयमा
त्रवाचिनो द्वितीयशब्दस्याद्वितीयविशेषसंको
चे प्रमाणाभावात् एकत्वविशेषणेनैव सजा
तीयस्य निषिद्धत्वात् सजातीयमात्रनिषेध
परत्वे चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानस्य
वाचारम्भणशब्दस्य चैतदात्म्यमिदं सर्वमित्या

ह्युपसंहारस्य च बाधप्रसंगात् न चैकमित्येकत्वसं
ख्याभिधानपरं तत्रैव तस्य लोके व्युत्पत्तेरिति
वाच्यम् एकरूपमेकासंख्यारहितो भाव इत्या
दिषु संख्यारहितेष्वपि रूपसंख्याभावेऽपि तत्
प्रयोगाद्बाधकाभावाच्चौपचारिकसंख्या
पीतिभावः तदेतदसमञ्जसम् प्रत्यक्षस्य प्र   विजानीय
विरोध x न्यथादिप्रमाणसिद्धस्यैव संकोचे प्रमाण
त्वात्- द्वैतसत्त्वे पूर्वक्रमोपसंहारादिषड्विध
तात्पर्यनिर्णयलिंगस्य पूर्वं प्रतिपादनेनानुत
द्बाधाभावात् सर्वस्य वस्तुनो मिथ्यात्वे निर्विष   विसाल स्य
यत्वेन सर्वशब्दस्य वैयर्थ्यापत्तेश्च- एतदात्म
मिदं सर्वमित्यत्र परिदृश्यमानद्वैतस्य सत्य
त्वप्रतिपादनात् कार्यरूपस्यानित्यत्वेपि
नि[illegible] x कारणरूपस्य सत्यत्वात् "अनित्यत्वास
त्वयोर्वैलक्षण्यात्-
विमतं सर्वं सत्त्वे पितृत्वादिभिर्गुणैः सजाती
यरहितं ब्रह्मैवैकमस्ति नान्यत् इति राक
शब्दः संख्यापरस्त्व मुख्यार्थको वा-
यत्सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतौ अनन्तपद
स्यार्थं पूर्वोक्तं चित्सुखाचार्या वदंति
नित्यमाकाशमनन्तं चेति प्रयोगात् वपनाजि अनन्तपदेनैव नि   त्यत्वलाभान्नित्यपदे चोनरुक्त्यात् x
न चान्योन्याभावाधिकरणत्वानधिकरण
त्वे व्युत्पत्त्यभावो दोषः "अनन्तशब्दस्य देश
तः कालतो वस्तुतश्चापरिच्छिन्ने व्युत्पन्नत्वा

50
40

तस्य नञ्समासे त्रिविधस्यापि नञस्य निषेधकतो
पपत्तौ रूपव्युत्पत्त्यनपेक्षत्वात् अत्रायमाश
यः सर्वत्र स्वभाववाचकशब्दानां प्रतियोगिवा
चकशब्दव्युत्पत्तित एव व्युत्पत्तिलक्षणतो हे
तो यौगिकत्वाद्यौगिकानां चावयवव्युत्पत्त्य
त्तित एव व्युत्पत्तेः समुदायव्युत्पत्त्यनपेक्ष
त्वात् यदि तत्र शब्दस्यावच्छेदकत्वेव व्युत्प
त्तेर्नञस्तन्निषेधे व्युत्पन्नत्वान्न रूपस्य स
मुदायस्य व्युत्पत्त्यपेक्षेति - एतन्न समञ्ज
सम् अनन्तत्वादेव नित्यत्वमिति हेतुगर्भितविशेषण
त्वेन पौनरुक्त्याभावात् - नापि परिच्छेदत्रयेण तश
ब्दस्य व्युत्पत्तिः यदानन्दिनान्तादिवद्देशकाल
क परिच्छेदवाचकत्वेन वस्तुपरिच्छेदावाचकत्वात् अवयव शक्तिकत्यनापेक्षयैकस्याः समुदायशक्तेर्लब्धत्वात ×
शाब्दिकनये सर्वत्र समासे समुदायशक्ति
स्वीकारात् नावयवव्युत्पत्त्यपेक्षापि -
यत्तु नेह नानास्ति इत्यस्यार्थचिन्तायां
नेह नानास्तीति न ब्रह्मणि नानात्वं निषिध्य
ते अप्रसक्तत्वात् नहि लोकतः श्रुतितो वा वादि
प्रसिद्धितो वा ब्रह्मणि नानात्वं प्रसक्तं येन प्रति
षिध्येत नानाशब्दस्य भावप्रत्ययान्तताभावा
त्वेन नानात्वनिषेधः न चैकयोर्द्विवचनैके
वचन इत्यत्र द्वित्वैकत्ववत् नानात्वं लक्षणीय
मिति वाच्यं विनाकारणं तस्या अयुक्तत्वात्
न च भवतु गोशब्देन गोत्वस्येव नानाशब्देन नाना

51
५२

५२

सजातीयविजातीयस्वगतनानात्वनिषेधस्यैवोचितत्वात् x

त्वाभिधानं समस्तप्रतियोगिकनानात्वनिषेधा
दद्वैतेसिद्धे संकोचेकारणाभावात् नानाशब्द
स्यनानात्ववाचकत्वेपितदोक्तिवैयर्थ्यम् तदु
पलक्षितव्यक्तिवचनत्वेचेह गोनास्तीतिवत्
जातीयनिषेधसिद्धेरिति-
अयुक्तमिदम् नान्तरिक्षेनदिवीत्यत्राप्रस
क्तस्यापिनिषेधोपलब्धेः श्रुतौतात्पर्याव
धारणायच-नचलक्षणाप्रयुक्तत्वंकारणावि
त्यादिइ नैत्यभिधेयम्- प्रत्यक्षादिप्रमाणविरोध
स्यतदर्थयोग्यताबाधकत्वात् अर्थान्तरेप्र
माणाभावाच्च-
यच्चोक्तम्तवाः नचेन्द्रोमायाभिरितीन्द्रियवा
रकवृत्तिरूप्या धावीश्वरस्यभेदो
ऽवभासतइत्येतावत्परमिदंवाक्यंनद्वै
तनिषेधपरमितियुक्तम् ईश्वरस्यनित्या
नुमेयस्येन्द्रियेकवृत्तिविषयत्वानं
गीकारात् नोरूपवादस्यवाच्यत्वादनवता
रवकरणाच्च वृत्तिरूप्यभिप्रायेणात्रमाया
शब्दाप्रयोगात् x नैयोगीन्द्रियापेक्षयावा x
यx मायाशक्तिविशेषाभिधानेच प्रकृतस्य
हरयः शतादशेतिवाक्यशेषोनसङ्गच्छे
त इन्द्रियवाच्यत्वाभिधानस्यमायाशक्ति
विशेषाभिधानंप्रत्यनुपयुक्तत्वात् अयं
वैहरयोऽयंवैदशचसहस्राणिबहूनिच

ननुहरिशब्देन सेन्द्रियवाचकत्वेन x

अन्योन्तरात्मात्ममयः अन्तर्वृत्तिरूपास्मि x या न मनोवृत्ते रूपासौ तेत्यादिश्रुतिप्रमेयभासस्यप्रसक्तेः x

नवाच्यत्वाभिधानं प्रकृतमायाप्रतिपादनोपयोगि=२

नेनातिचेति ~~वाक्यशेषे~~ वाक्यशेषे सर्वस्येश्वरात्मकत्वप्र
तिपादनविरोधाच्च त्वन्मते तेषामभिन्नत्वाभ्युपग
मात् नचनिमित्तत्वाभिप्रायेण सामानाधिकरण्यमु
पपत्तेरितिवदन्ति- तत्सर्वंपाम्भाति मूलकम्-
~~इति...चिदचिदात्मकस्येश्वरस्य~~ केवलस्याप्रत्यक्ष
x* त्वेपि चिदचितोस्तच्छरीरयोः प्रत्यक्षत्वेनेश्व
तद्विशिष्टस्य रस्यापि प्रत्यक्षयोग्यत्वेनित्यानुमेयत्वाभा
वात् घटं पश्यामि नाम हं जानामीतिप्रत्यक्षा
ज्जडजीवात्मनोः प्रत्यक्षत्वे विवादात्- हिरण्य
केशो हिरण्यश्मश्रुः कप्यासमित्यादिश्रु
तिभिस्तस्य शरीरित्वाभिधानेन मनुष्यात्तस्या
तदx परोक्षयोग्यत्वात्- ग्रेमपरौभवनस्य यत्र त दी
त्तत्तलवकारोपनिषदि च स्फुटं प्रतिपादना
त्- तलवकारोपनिषदन्तर्गतगाथा च द
यानव्हमनमदतेंद्रष्टव्या- x नत्वेतत x
ननु सपर्यगाच्छुक्रमकायमिति मंत्रेण तस्या
कायत्वेन कथनात्कथं तस्यापरोक्षत्वेनेतिचे
न्न ज्ञातोसि नह्यकायमित्यनेन कायधारि
त्वं निषिध्यते किन्तु रूपत्वं- कायशब्दार्थ काय
स्य ग्रस्पर्शादिवत्याधिकरणात् प्रतिपादितमेत
च्चुरस्तात् धाविमोपूर्वाविति गीतावाक्यव्या
ख्यायां- ईश्वरस्यानुमानगम्यत्वेपराकृ मावे
तपुरस्तात्- यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुति
रपितस्यापरोक्षतां प्रतिपादयति-

53
५३

नचतन्मावतारप्रकरणम् ईश्वरनिरूपणस्यत
त्प्रकृतत्वेन तदवताराणामपीश्वरत्वेन प्रकृतत्वा
नपायात् - प्रकृतेस्तच्छरीरत्वेनैव प्रकृतिविकृतिरूप चेX
त्वेनेंद्रियवाङ्कल्पाभिधानस्य तत्सामानाधिकरण्यस्यैतेषां
भिन्नत्वेनाप्युपपत्तेरिति - श्रुतिरपि सहस्रशीर्षा पुरुषः
सहस्राक्षः सहस्रपात् इत्यादि गीतायामपि स
र्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् सर्वतः
श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति वाक्येप्र चनस्य
कृतिशरीरत्वरवोपपद्यते -
यत्तु मृत्योः स मृत्युमित्यत्र नाभेददर्शिपतिर्नेह विधX
नानास्ति किंचनेति द्वैतनिषेधवैयर्थ्योरप्र
तुपासनप्रकरणत्वाच्च पूर्वापरालोचनायां
चास्यप्रकरणस्य निष्प्रपञ्चब्रह्मात्मत्वप्र
तिपत्तौ तात्पर्याधिगमात् ननु पूर्वापर तं देवा
वाक्यानामुपासनपरतावदृश्यते "यौषु ज्योति
र्होपासतेऽमृतं विज्ञाय प्रज्ञां कुर्वीत - सर्वस्य षां ज्यो
वशी सर्वस्येशानः *आत्मा देवमनुदानो वि तिरा X
द्वेनवसुयरवं वेदेत्यादि श्रवणादिति चे *ब्रह्मासम नोह्दनेध नब्र्दद्दति
न्नेवम् प्रसंगागतत्वादुपासनानुवादस्य
निष्प्रपञ्चब्रह्मप्रकरणत्वस्यत्वस्योपासना
नुवादोनानुविधिर्वाक्यभेदप्रसंगात् - किंचय
स्मिन्पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः तमे
वमन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमितिश्रु
त्या साक्षात्कारलक्ष
णां संपादयेत् =

इति प्रज्ञा स्तु नः वि ज्ञायक नत्रैव पूर्वोत्तरभागयोरुपासनाप्रकरणत्वुपासनप्रकरणमिदम =

54
48

अतिरिक्तत्वंचात्राभेदानधिकरणत्वंतेनला
घवमितरता- अनुमानतोविषयदेशात्मनां
चसत्यभेदसिद्धिरेवम्-
ननुभेदस्याभेदिनोवाहृश्यवर्गस्यसत्यत्वे
तस्यतज्ज्ञानस्यचकःसम्बन्धइतिविवेच
नीयं नतावत्संयोगः तस्यगुणत्वेनद्र
व्यमात्रवृत्तित्वात् ज्ञानस्यगुणत्वेनद्रव्य
त्वाभावात्- नापिसमवायः आत्मस
मवेतत्वात्ज्ञानस्य- नाप्यन्यःकश्चित्
तस्यदार्थनियमानुगुणःसम्भवति-
नाप्यभावः अभावतज्ज्ञानयोःसंबंधा
भावप्रसंगात् किंच यत्रयत्रास्यानभि
वत्तस्यतस्यतज्ज्ञानेनसम्बन्धोनस्यात्त्ववृत्तिविरो
धात् एवंचदृग्दृश्ययोःसंबंधानुपपत्तिर्दृश्य
सत्यत्वेबाधिकेतिचेन्मैवंशङ्किष्ठाः नतत्प्रति
पत्तिहेतुभूतेन्द्रियलिङ्गादेस्तत्तद्विषयसम्बधा
देवतदुत्पन्नज्ञानानांतत्तद्विषयंप्रतिनियमासि
द्धावन्तरेणापिसम्बन्धान्तरमतिप्रसंगाप्रसं
गात्- अत्रायमर्थः नियामकोहिसंबंधः
संभवतिचतत्रनियमः तत्तज्ज्ञानानांतत्तद
र्थैःस्वतंत्रसंबंधाभावेपि तत्तज्ज्ञानजनकेन्द्रि
यलिंगशब्दादीनांतत्तदर्थैःसम्बन्धेनेति- ६६४
अतएवबादरायणेपाद्वितीयाध्याये श्रा

54

४८

४८

तो प्राणचक्षुश्श्रोत्रमनसां सिपंच जनैवाख्यानि
पंचरातेषांकारणमाकाशश्च यस्मिन्नं निष्ठितः
तमेवामृतंब्रह्मात्मानं अहं मन्ये अनेन मन
नेनाहं विद्वानमृतोभविष्यामि इत्यर्थिका
यां पूर्वोदिताकाशादितत्वाधारतयास पंच
वार्थस्या नाप्रसक्तावेवधारणस्य तमेवधीरो विज्ञाये
नेत्यत्रचैवकारस्यतन्निवारणपरत्वात्-
अरूर्णाकुर्वीतेतिचवक्ता प्राद्देन विस्तानशब्दाभि
धेयपरोक्षज्ञानातिरिक्तसाक्षात्काराभिधा
नांगीकारे तस्यानवधिसुखरूपानन्दसा
क्षात्कारतयाफलत्वेनविधेयत्वानुपपत्तेः
सर्वस्यवशीत्यादेः स्तुतिपरत्वेन गुणविधाना
र्थत्वाभावात् प्रतिपादितत्वाच्चेदं-कामा
दीतरत्रतत्र [redacted] चायतनादिभ्यः अ-३ पा-३ सू-३९
इतिच नैरुक्तं तन्नसाधु- नेहनानास्तीत्यस्याः सजा व
तीयनिषेधपरत्वेन द्वैतनिषेधाभावे पूर्वत्र १२ स्य
तिपादितत्वात्- मृत्योः सेतिश्रुतेरुपासन
प्रकरणस्यत्वात् पूर्वोत्तरभागयोरुपास
नप्रवणात् निष्प्रपञ्चब्रह्मप्रकरणमेवव
देनास्तियतः अतोविशेषणासिद्धिदोषत्त्व
द्धेतो- निष्प्रपंचतायामेवपर्वकादस्त्वयासह
कथंप्रतनिष्प्रपंचब्रह्मप्रकरणत्वकपनंसे

55
४४

गच्छते- यस्मिंश्चेतिश्रुतौसप्रपंचेनेश्वरेण
सहाभेदध्यानंविधीयते- तमेवामृतंब्रह्मा
हंजीवब्रह्मात्वेनज्ञानन्नमृतोभविष्यामिइ
तिश्रुतितात्पर्यात्- एतांकुर्वीतेत्यस्यसा
क्षात्कारलक्षणांसंपादयेत् विज्ञानेन तथा
चविज्ञानस्यविधेयत्वेनसाक्षात्कारस्यतत्
फलत्वेनविधेयत्वाभावात्-
कामादीन्नरजेतिसूत्रेसर्वस्यवशीत्यादेर्वि
णविधानार्थत्वमेव-
यत्तुनेहनानेत्यागमस्यस्वरूपप्रतिपत्तौ च
पदपदार्थसम्बन्धावगमेचप्रत्यक्षादिसापे
क्षत्वेपि प्रत्यक्षस्य तत्पक्षस्य तत्पक्षविष
यस्यचपारमार्थिकत्वांशेऽनुपजीव्यत्वा
त्तद्बाधनेविरोधाभावात् एतदुक्तंभवति
निषिध्यमानंतदीयपारमार्थिकत्वंनापेक्ष्य
तेयच्चापेक्ष्यतेसांव्यवहारिकंरूपंनतद्बा
ध्यते- सांव्यवहारिकभेदस्यज्ञानोदयना
न्तरीयकतयाश्रुतिबाध्यत्वाभावात्- अ
यंभावः यथानेषांवास्तवत्वज्ञानंतत्प्रति
पत्तिविरोधिनतथासांव्यवहारिकाका
रज्ञानमिति- एवंचनव्यावहारिकभेदसा
पेक्षत्वयाश्रुतेरप्रामाण्यप्रसंग इति-
एतदनेनरोमन्थायितम्- व्यावहारिकसत्ता

56
५६

५६

या: पूर्वमद्दूरीत्यानिराकृतत्वात् किंच किं पुनरिदं मिथ्यात्वं प्रमाणागम्यत्वं वा १ अप्रमाणज्ञानगम्यत्वं वा २ अयथार्थज्ञानगम्यत्वं वा ३ सद्विलक्षणत्वम्वा ४ सदसद्विलक्षणत्वं वा ५ अविद्यातत्कार्ययोरन्यतरत्वं वा ६ ज्ञाननिवर्त्यत्वम्वा ७ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा ८ बाध्यत्वं वा ९ स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वम्वा १०

नाद्यः ब्रह्मणोपि मिथ्यात्वप्रसंगात् तस्य स्वप्रकाशत्वेन त्वया सर्वप्रमाणागोचरतानंगीकारात् न द्वितीयः प्रपञ्चस्यत्वन्मते वादिभिरपि तस्य तस्य शुक्तिरूप्यकालादेरिव नतेन रजताद्याकारेण प्रतीयमानतया ऽप्रमाणज्ञानविषयत्वात् सत्यत्वेपि प्रपद्यमानमर्यान्तरमेव अन्यच्चेदम् सर्वस्यैव प्रपञ्चस्यैवं विधत्वमंगीकृतं तात्त्विकमिदं ब्रह्मकार्यमिदमनिर्वचनीयमिति इदमिति च स्फुरतर मर्यान्तरम् स्वतेरप्रमाणतयातद्विषयस्य तथा त्वापातात्वैत्यर्थान्तरम्- गोचरत्वेऽप्यतेन पुनर्विषयत्वमेवतद्विवक्षायां चनेयाथिकादेरसिद्धिः सर्वस्यापि यथार्थे प्रमाणविषयत्वात्=

न तृतीयः तत्तदा रोपाधिष्ठानतया सर्वस्यायथार्थज्ञानगम्यत्वांगीकारात्- न चतुर्थः सद्विलक्षणस्यापि शशविषाणादेरमिथ्यात्वापातात् न च शशविषाणस्यापि मिथ्यात्वादनतिव्याप्तिरिति वाच्यम्- अनिर्वचनीयम् मिथ्या मत प्रपञ्चस्यापरोक्षप्रतीतियोग्यत्वमर्थक्रियासामर्थ्यं च स्वीकुर्वद्भिः श

किंच सदसद्विलक्षणमनिर्वचनीयत्वम् मिथ्यात्वं येन विकल्पासहत्वा
त् तथाहि न तावत् सद्विलक्षणत्वं शशशृङ्गादावव्याप्तेः नाप्यसद्विलक्ष
णत्वं ब्रह्मण्यतिव्याप्तेः असत्यत्वाविरोधित्वाच्च नापि सदसद्भिन्नत्वं सद
सद्रूप प्रति योग्यत्व सिद्धेः वस्तुतः सदसदन्यतरत्वे यमेन उभयभिन्न

शेविषाणवैषम्येष्टेर मिथ्यात्वस्वीकृतमेव शश
शृङ्गादेः नचैवं सत्याद्वैतविरोधः सदद्वैताभ्युपग
मादतो मिथ्यात्वनिरनतिलंघनीया- नवक्रमः
एकैतरनिषेधस्यान्यतरविधिनान्तरीयकत
यातदसंभवात् परस्परविरोधेहिनप्रकारा
न्तरस्थितिरितिन्यायात् नवष्ठः अनिर्वच
नीयाविद्यायाअप्रसिद्धत्वात्- केयमविद्या
किमनिर्वचनीयदंजयमानाविद्या किंवा
अहरणमिथ्यात्मिका- आद्ये अप्रसिद्धिः
द्वितीये अग्रहणाद्यात्मिकाविद्यायास्तत्कार्य
स्यप्रवृत्तिसंस्कारादेः सत्यत्वात् अतोऽर्थान्त
रम्- नसप्तमः ज्ञाननिवर्त्यस्यापिज्ञानमु
खादेः सत्त्वात् सर्वस्य सत्यत्वेऽपि परेश्वर
ज्ञाननिवर्त्यत्वांगीकारात्- अत्रायमाशयः
आत्मविशेषणानामपर्यायमन्यतिमनि
च्छमाप्ततरोत्तरेण पूर्वपूर्वनिवृत्तिस्वीकारे
श्रेरथान्तरत्वम् नकेवलं सुखादेरेव सर्वस्ये
वसंहरणीयस्यप्रपञ्चस्येश्वरज्ञानेननिमि
त्तम्, तेननिवृत्तिस्वीकाराद्भवतितरामर्था
न्तरत्वम्- परिणामवाद्यभिप्रायेणवा-
नाष्टमः प्रतिपन्नोपाधावित्यत्र प्रतिपन्नशब्द
स्यकोऽर्थः किंप्रमाणज्ञानमुतभ्रान्तिज्ञानमा
होस्वित्साधारणम् नाद्यः प्रमाणेनयदुपाधौ
यः प्रतिपन्नस्तस्यतत्रनिषेधासम्भवात्

सत्त्वनिषे
धे सत्त्व
न निषेधे
सर्वनान्त
रीयक
मू ८

त्वासंभवात्
अंतरत्वन स
त्वानधिकर
णत्वे सत्य स
त्वानधिकर
णत्वम् निष
र्मकेब्रह्मण्य
तिव्याप्तेः

प्रांतिप्रतियन्तोयाथोलिंखेधप्रतियोगित्वस्यस
त्वेपिसंभवेऽर्थान्तरत्वात् नकेवलंसंभवः
गप्रमेयस्याव्याप्तिवादाभरयिकंचिन्नविपक्षस्या
व्यन्नसत्तास्वीकारात् एतेनसाधारणपक्षो
पिनिरस्तः ननवमः किमिदंवाध्यत्वं किं
वाधकज्ञानविषयत्वमुततन्निवर्त्यत्वम् उभ
यथाप्यर्थान्तरतायास्तादवस्थ्यात् प्रतीत्या
देरपिवाधकज्ञानविषयत्वांगीकारात् न
प्रथमः वाधकज्ञानेनपूर्वज्ञाननिवृत्त्यभ्यु
पगमाच्चनद्वितीयइति नदशमः संयो
गविभागशब्दानां विशेषगुणानां प्रदेशवृ
त्तीनां स्वात्यन्ताभावसमानाधिकरणतया
प्रतीयमानानामपिपरैः सत्त्वांगीका
रात् अर्थान्तरतायादुरतिक्रमत्वात्-
अयमर्थः संयोगविभागयोरव्याप्यवृ
त्तितां स्वीकुर्वद्भिः स्वदत्यन्ताभावसमाना
धिकरणत्वमंगीक्रियते नचतत्रापिघटा
वयवावच्छेदेनसंयोगविभागयोर्भिन्नाधि
करणता शक्योपपादना तथाहिनतदव
यवसंयोगस्यापितदवयववृत्तितापरंप
रयापरमाणावेवपरिनिष्ठेतिनाव्यवस्था
प्रसक्तेरदयं संयोगयोगीति नदनिच्छ
ताप्यवच्छिन्नतिनायत्वेवसंयोगस्यैवतद
त्यन्ताभावोऽभ्युपेयः नचप्रमाणविनि

59
५८

वेष्टितयोर्विरोधशंकावकाशः अतिप्रसंगा
त्- शब्दस्य चाकाशे वर्त्तमानस्य प्रदेशभेदमा
दायाप्येकस्मिन्नेव नभसि भावाभावौ समा
नाधिकृतौ स्वीकृतौ- एवं सर्वगतात्मवादि
नामात्मविशेषगुणानां तत्राप्यतिप्रसं[illegible] ते
सात्त्वादवैकारण्यप्रदेशवृत्तीनामिति तद
धिक नुमतिमनुसन्धानेनोक्तम्- अत्र लक्षणन
निव्याप्त्यो द्वितीयस्योत्थानम्- अर्थान्तरता
निवृत्त्यै तृतीयचतुर्थयोः असत्यतिव्याप्ति
निवृत्त्यै पञ्चमः असम्भवनिवृत्त्यै षष्ठः
असम्भवातिव्याप्तिनिवृत्त्यै सप्तमः अर्था
न्तरनिवृत्त्यर्थमेवाष्टमोपि असंभवा
र्थान्तरयोर्निवृत्त्यै नवमः दशमोप्यर्था
न्तरनिवृत्त्यर्थमेव- तदेवं नवप्रपञ्च
मिथ्यात्वनिरुक्तिर्नोपितत्रप्रमाणम्
यद्यपि लक्षणमपि प्रमाणविशेषल
व तथापि न तत्स्वरूपसिद्धिपरमपि चि
तरव्यावृत्तिं व्यवहारं चोपहरति प्रमा
णानुलक्षितमेव स्वरूपं साधयतीति स
वेत्तानयोः पृथगादेव समर्थनं द्रष्टव्य
म्- तथाहि न तावत्प्रत्यक्षं तत्रक्रमते
उक्तप्रकाराणामन्यतमस्यापि मिथ्यात्व

5 60
६०

स्य प्रत्यक्षसिद्धत्वेन तत्र वादिनां विवादाभावप्रसंगा
त् नहि प्रत्यक्षसिद्धे घटादौ विवदन्ते विवदन्ते
वाद्यापि वादिनो मिथ्यात्वे - न च विवादपदं मि
थ्यात्वदृश्यत्वाच्छुक्तिरूप्यवदित्यनुमानं मान
म् प्रमाणागम्यत्वस्य सदसद्वैलक्षण्यस्याबि
धातकार्ययोरन्यतरत्वस्य वा साधनेऽप्रसि
द्धविशेषणतादयथार्थज्ञानगम्यत्वस्य च गुरु र्थ
मतेऽप्रसिद्धत्वात् - अयं भावः दशधा हि मि
थ्यात्वसंभवः तत्र प्रमाणागम्यत्वादिरूपसा
ध्येऽप्रसिद्धविशेषणता अविद्यात्वस्यापि निर्व
चनीयाविवक्षिता इतरयोस्तस्याऽप्रसम्प्र
तिपन्नत्वात् न च यथार्थज्ञानगम्यत्वं सा
ध्यं तथा च नाप्रसिद्धविशेषणता यद्यप्यसा प्य
कमिदं प्रसिद्धं तथाप्यख्यातिवादिनामप्र
सिद्धविशेषणता सोऽपि हि तावदेवं मिथ्या
इति x त्वे विप्रतिपन्नः तत्ख्यातिरिक्तोऽप्रसिद्धसा
धनत्वात् - किं च नाम दृश्यत्वं - फलव्याप्यत्वं
वा - वृत्तिव्याप्यत्वं वा - साधारणं वा - नाद्यः अ धर्माध
तीन्द्रियेष्वनदभावेन भागासिद्धत्वात् शुक्ति र्मादिषु:
रूप्यादिव्यतिरिक्तमखिलं जडं पक्षः अतो
तीतादेरपि पक्षत्वात्तत्राप्रवृत्तेः न द्वितीयः
ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्यत्वाङ्गीका
रात् अनैकान्तिकत्वात् न तृतीयः ब्रह्मण्य

ज्ञानलक्षणफलव्याप्यत्वं इन्द्रि
यजन्यवृत्त्यभिव्यक्तचैतन्यविष
यत्व = ७

61
६२

एतत्पटसमवायिकारणतन्तवः

नैकान्तिकत्वादेव एतेन जडत्वाद्यनन्तवत्त्वपरि
च्छिन्नत्वादियो हेतवो निरस्ताः तत्रापि साध्या
सिद्धेः अथायंपटः एतत्तन्तुनिष्ठात्यन्ताभा
वप्रतियोगी दृश्यत्वाद्घटवदिति अत्राभावप्र
तियोगीत्युक्तौ कार्यकारणभेदवादिनां तार्कि
काणामेतत्तन्तुष्वेतत्पटान्योन्याभावप्रागभा
वप्रध्वंसाभावांगीकारेणार्थान्तरतानदर्थम
त्यन्ताभावप्रतियोगीत्युक्तम् तावन्मुक्तेयत्
किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वेन सि
द्धसाधनतापातात्तत्परिहाराय तन्तुनिष्ठेति-
एतत्पटस्यैतत्पटाजनकत्वेनाभिमततन्तुनि
ष्ठात्यन्ताभावप्रतियोगित्वेन पुनरपि सिद्ध
साधनतापात्तत्परिहारार्थमेतदिति तन्तु
विशेषणम् एतत्तन्तुशब्देन च वादिनो जन
कत्वेनाभिमतास्तन्तव उच्यन्ते पटान्तराये
नयासिद्धसाधनतावारणाय मितिपट या
विशेषणम् घटस्यैतत्तन्तुनिष्ठात्यन्ताभावः
प्रसिद्ध इति साध्यप्रसिद्धिः न समीचीनमि
दमनुमानम् तन्तुनिष्ठात्यन्ताभावे दृश्य
त्वहेतोश्चानैकान्तिकत्वात् कथं यद्यदृश्यं
तत्तदेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगीति
व्याप्तिरेष्टव्या नचेयमस्ति एतत्तन्तुष्वपि सम
सपटस्यात्यन्ताभावसाध्यत्वे नतस्यैतत्तन्तुनि

मोक्षायुराधौं श्रीरामोदकायमानवायु-

श्यत्वाभावप्रतियोगित्वमस्ति तत्स्वीकारे च न
साध्यस्यैवाभावादप्रमाणं व्याहतं स्यादथ च तत्र
दृश्यत्वमस्तीत्यनैकान्तः तथा दृश्यत्वहेतावप्र
कृतसाध्यं नास्ति एतत्तन्त्रदृश्यत्वात्यन्ताभाव
प्रतियोगित्वेन तत्त्वाम दृश्यतया साध्यासिद्धि
प्रसंगादथ च दृश्यत्वमस्तीत्यनैकान्त इति भावः -
किंच प्रपञ्चस्य प्रामाणिकत्वे मिथ्यात्वानु
मानानां धर्मिग्राहकप्रमाणेन बाधः प्रमा
णगम्यत्वस्यैव सत्वात् न तु न वयं प्रमितमप्र
मितं वाश्रयमाश्रयामहे नापि शशविषाण
तु यमाणमपि प्रतीतिमात्रसिद्धं प्रतीतिमात्रसिद्ध
स्याश्रयतोपपत्तौ तदतिरिक्तप्रमितत्वस्याप्या
लि श्रयकोटिनिवेशनेन किंचनमानं पश्याम इ
ति चेन्न प्रतीतिमात्रसिद्धस्याश्रयत्वे दूषण
भूषणादेरपि प्रतीतिमात्रसिद्धस्य सर्वत्र संभ
वात्सर्ववादविधिनिषेधप्रसंगः - अयम
र्थः न प्रतीतिमात्रस्य साधनदूषणते तथास
ति सर्वदर्शनानामपि साधनबोधनप्रसंगात्
त्वोपप्लवप्रसंगात् केनामताहृशानि साधना
नि दूषणानि वा न सन्ति यानि प्रतीतिपथमपि
नावतरेयुः शब्देनापि तत्प्रतीतीनां शक्यजन
नत्वादिति - एवं साध्यहेतुदृष्टान्तानामपि प्रा
माणिकत्वे दृश्यत्वहेतोरत्रानैकान्तिकता

ऽप्रामाणिकत्वे वा साध्यसाधनाद्यभावादनुमा
नासिद्धिः - तथाहि तेषांप्रामाणिकत्वे सत्यत्वेन
विपक्षतया तत्र वर्तमानो हेतुरनैकान्तिकः स्याद
प्रामाणिकत्वे चेद्यथायुक्तमसिद्धविशेषणता
तास्वरूपासिद्ध्याश्रयासिद्धीनतः प्रसज्येरन्निति
नागमः प्रपंचमिथ्यात्वे मानं - पूर्वप्रदर्शिततदर्था
त् - नतु स्वाश्रयत्वेनाभिमतयावन्निष्ठा
त्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति लक्षणं -
ऽप्रत्यक्षं ऽप्राश्रितं नतु कार्यमविद्यादावव्याप्तेस्तथा
चाश्रिताश्रयत्वेनाभिमतयावतिस्थितात्यन्ता
भावप्रतियोगित्वमितिलक्षणम् यावति स्वाश्रये
स्यात्यन्ताभावासंभवादभिमतपदं तथा च वस्तुतो
रजताद्यनाश्रयेऽपि शुक्त्यादौ रजताद्याश्रयत्वेना
भिमते वर्तमानरजताद्यत्यन्ताभावप्रतियोगि
त्वं शुक्तिरूप्यादेरस्तीति तत्सार्थक्यम् - तेन
प्रमितव्यावृत्त्या च वाधः परिहृतः - यावत्प
दभावे कपिसंयोगाद्याश्रयत्वेनाभिमतवृक्षे
मूलावच्छेदेन वर्तमानात्यन्ताभावप्रतियोगि
त्वं शाखावच्छेदेन स्थितकपिसंयोगादेरस्तीति
सत्यत्वाविरोधिप्रतियोगितदभावसामानाधि
करण्यरूपार्थान्तरसिद्धिवारणं न स्यात् तद्वा
नेन तु स्वाश्रयत्वेनाभिमते शाखादौ संयोगादेर
त्यन्ताभावप्रतियोगित्वसाधनान्नार्थान्तरापत्तिः
नऽक्रम् सर्वेषामपि भावानां स्वाश्रयत्वेन सम्मते

64

६४

ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्माभिन्नत्वाध
देवनदेवं यथाशक्तिरूप्यम्

द्विविधस्तत्पदे॰ क्रमिथ्या
त्वपदे वा = ४

प्रतियोगित्वमत्यन्ताभावप्रतिनयामनेति-
नचस्वाश्रयेस्वरूपेणातदत्यन्ताभावाभावेपि
पारमार्थिकत्वावच्छिन्नतदत्यन्ताभावसत्वान्न
बाध इत्यभिमतपदं व्यर्थमितिवाच्यम् ग्रंशि
न्यकेस्वरूपेणैव ब्रह्मणिप्रपञ्चाभावोपप
गमात् - यदिकश्चित्पदाभिन्नत्वमपिस्यपदत्व
प्रयोजक [illegible] मतोभेदेदानमानं चासिद्ध
मिति ब्रूयात्तदापदान्तरमादि ग्रयंपटः एतत्तंतु
निष्ठात्यन्ताभावप्रतियोगीपटत्वात्पटान्तरवदित्या
घनुमानं मिथ्यात्वे प्रमाणं - गुणकर्मादौ चैतत्पटरू
पमेतत्पटनिष्ठात्यन्ताभावप्रतियोगिरूपत्वाद्रूपा
न्तरवदित्यादिप्रयोगाः तदुक्तम् ग्रंशिनः स्वांश
गात्यन्ताभावस्य प्रतियोगिनः ग्रंशित्वादितरांश
शीवदितिगेपैव गुणादिष्विति - अत्र समवायसंब
न न्धेनचैकावच्छेदेनेत्यपिद्रष्टव्यम् तथाच संयोग
सम्बन्धेनदेशावच्छेदेनचपूर्वेणार्थान्तरता-
एवंव्याधिकरणधर्मानवच्छिन्नप्रतियोगिता
कत्वमत्यन्ताभावविशेषणं देयं तेन घटत्वादि
व्याधिकरणधर्ममादायनार्थान्तरता तथैव पटोप्यति
कालिकत्वमप्यत्यन्ताभावविशेषणं देयं तेन कालिका
तन्तुषु पटसत्त्वेपि पटघटोभयं नास्तीति पटघ त्यन्ताभाव
टोभयत्वावच्छिन्नप्रतियोगिताकपटघटात्य मादायना
न्ताभावमादायनार्थान्तरता - तथाचायं पटः र्थान्तरता
समवायसम्बन्धावच्छिन्ननिरवच्छिन्नव्याधि तथाव्या
सज्यवृत्ति
धर्मानवच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावविशेष
णं देयं तेन ४५२

"न्नपरकालवृत्तिव्यासज्यवृत्तिधर्मानवच्छिन्नप्र
तियोगिताकात्यन्ताभावप्रतियोगीत्यर्थः -
नचैतन्तन्तुषु पटः समवायीति प्रत्यक्षबाध इति
वाच्यम् उक्तप्रत्यक्षस्य भ्रमत्वमात्रसाधारणत्वेन
चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशंका
स्कन्दितत्वेनाबाधकत्वात् नच सन् घट इ
ति प्रत्यक्षबाधो घटादेर्मिथ्यात्वे इति शंक्यम्
अधिष्ठानब्रह्मसत्ताया एव तत्र विषयतया घ
टादेः सत्यत्वासिद्धेः" नचनीरूपस्य द्रव्यस्य
चक्षुराद्ययोग्यत्वमिति नियमः मन्मते ब्र
ह्मणो द्रव्यत्वासिद्धेः गुणाश्रयत्वं समवायि
कारणत्वं वा द्रव्यत्वमिति नैयायिकमतं नहि नि
र्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिका
रणता समवायासिद्धेः अपरिणामित्वाद्ब्रह्म
णः नचारंभवादिनैयायिकप्रत्यपरिणामि
त्वादिनिहेतुकथनमयुक्तं तेन परिणामवा
दस्यास्वीकृतत्वादिति वाच्यम् आरंभवाद
स्य कार्त्स्न्यैकदेशविकल्पेन निरस्तत्वेन परि
णामवादस्यैव स्वीकर्तव्यत्वात् तथाच ब्रह्मणः प
रिणामित्वासंभवेन समवायिकारणता
नास्तीति - ननु ब्रह्मणोपि समवायिकारण
त्वं केवलस्यापरिणामित्वेपि मायाविशिष्ट
स्य प्रपंचोपादानत्वात् अन्यथाऽप्यभिन्ननि
मित्तोपादानवादभंगापत्तेः ततश्च ब्रह्मणोन

नचब्रह्मणः स्वप्रकाशत्वात् कथं चाक्षुषादिज्ञानविषयतेति
वाच्यम् नीरूपस्यापि रूपादेः प्रत्यक्षत्वात् ×

द्रव्यत्वासिद्धिरिति चेदस्तु वा द्रव्यत्वं ब्रह्मणः य
थाऽध्वरमीमांसकानाम् अस्मिन्काले घटो ना
स्तीति प्रतीतिबलान्नीरूपस्यापि कालस्येन्द्रि
यवेद्यत्वं स्वीकृतं स्वीकृतं तथा ब्रह्मणि अविष
विना यतानुपपद्यमानं सन्घट इत्यादि प्रतीति
बलाद्ब्रह्मणश्चाक्षुषादि ज्ञानविषयत्वे सन्घट
इत्यादि प्रत्यक्षस्यानुपपत्तिर्न ~~[illegible]~~
~~[illegible]~~ वस्तुतस्तु प्रत्यन्यथासिद्धप्र
तीतिबलेन ब्रह्मव्यतिरिक्तचाक्षुषतायामेव
महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकं बोध्यम् ।
ननु ज्ञानमानेन प्रपञ्चमिथ्यात्वसाधकं घ
टः सन्नित्यादि प्रत्यक्षबाधितत्वात् न चास
यधिष्ठानति ष्ठसत्ता घटादिनिष्ठ त्वेन विष यीकरणात् वधिष्ठानसत्ताविषयत्वाद्भ्रमः बाधकाभा
वात् यथेदं रजतमित्यादिज्ञानस्य नेदं रजत
मित्यादि बाधकसत्त्वाद्भ्रमत्वं न तथा घटः स
न्नित्यादि प्रत्यक्षस्य न सन्घट इत्यादि बाधका
भावान्न भ्रमत्वम् न च तदभाववति तत्प्रका
रकत्वस्य भ्रमत्वप्रयोजकस्य सन्घट इत्यादि
ज्ञानेऽसत्त्वाद्भ्रमत्वस्यादितिवाच्यम् मन्मते
त्य प्रपञ्चस्य सत्त्वेन सन्घट इत्यादि ~~[illegible]~~
घटादिनिष्ठसत्यत्वावगाहिज्ञानेऽपि तदभाव
वति तत्प्रकारकत्वस्य भ्रमत्वप्रयोजकस्या
भावात् न च बाधकाभावादिति वाच्यम् बाधकज्ञान

सत्वे पूर्वज्ञानस्य भ्रमत्वं बाधकज्ञानाभावे पूर्वज्ञानस्य
भ्रमत्वाभाव इति प्रतीयमानत्वेन पूर्वपूर्वज्ञाने उत्त
रोत्तरज्ञानस्य नाशकत्वेन बहूनां पूर्वज्ञानानां भ्रम
त्वं स्यादुत्तरज्ञानरूपबाधकसत्वादिति वाच्यम्
अधिष्ठानज्ञानजन्यत्वे सति भ्रान्तिज्ञानविष
यरजताद्यत्यन्ताभावविषयकत्वाभिन्नबाधक
त्वाभ्युपगमादुत्तरज्ञानानां नियमेन बाधकं
त्वाभावाच्च नचास्थूलादिवाक्यात्स्थूलाद्यत्यं
ताभावबद्ब्रह्मेति ज्ञाने जाते घटसदभेदावगाहि
सन्घट इति प्रमात्मकप्रत्यक्षं न सम्भवतीति न
हि अस्थूलादिवाक्यजन्यज्ञानस्य सन्घट इत्या
दिप्रमात्मकप्रत्यक्षबाधकत्वांगीकारे तेनैव प्र
पञ्चमिथ्यात्वसिद्धावनुमानवैयर्थ्यात् घटादि
प्रपञ्चस्य स्वरूपेणासत्वेपि तन्निष्ठं पारमार्थि
कत्वं नास्तीत्यर्थपरतया ऽस्थूलादिश्रुत्युपपत्तेः १
घटादिस्वरूपावगाहि सन्घट इत्यादिप्रत्यय
बाधितत्वान्नोक्तानुमानं घटादिप्रपञ्चस्वरू
पाभावसाधकं नचोक्तानुमानमेव तद्बाधकं प्र
त्यक्षस्य सर्वप्रमाणज्येष्ठतया ऽनुमानेन तद्बा
धायोगात् अन्यथा वह्नावनौष्ण्यानुमानेन तदौ
ष्ण्यप्रत्यक्षबाधापत्तेः किंच प्रपञ्चस्य स्वरूपे
णासत्वेन ज्ञानस्य बाधितार्थविषयत्वेनाप्रामा
ण्यापत्तौ घटादिज्ञानं प्रमा शुक्तिरूप्यादिज्ञान
मप्रमेति विभागाभावो ऽसत्ख्यातिवादिमतप्रवे
शश्च प्रसज्येत किञ्च कर्मकाण्डस्याप्रामाण्यापत्तौ

मात्र

68

तत्सामान्याद्वेदैकदेशस्य वेदान्तस्याप्रामाण्या
पत्तेः अपि च घटादेरसत्त्वे तदभावेन निरु
ध्येत सत्त्वमेवाधिकरणप्रतियोगिभ्यामभा
वनिरूपणात् अन्यथा शशविषाणस्यापि
अभावप्रतियोगित्वापत्तिः अत एवाहुः सत्त्व
मभावो निरूप्यत इति ततश्च प्रत्यक्षबाधि
तं प्रपञ्चमिथ्यात्वानुमानम् न च ब्रह्मणि
ष्ट विषयतां विनानुपपद्यमानसन्धृष्ट
त्यादिप्रतीतिबलाद्ब्रह्मणः सत्यत्वं यदि
स्वीक्रियते तर्ह्याकाशनिष्ठविषयतां विना
नुपपद्यमानाकाशो वर्तते इत्यादिप्रतीतिब
लादाकाशस्यापि सत्यता स्यादिति चेन्न
यां द्वैतपरिभाषा धर्मराज आह बाढम्
त्रिविधं सत्त्वं पारमार्थिकव्यावहारिकप्राति
भासिकभेदात् तत्र कालत्रयाबाध्यत्वं पा
रमार्थिकं सत्त्वं ब्रह्मणः संसारदशायामबा
ध्यत्वं व्यावहारिकं सत्त्वम् आकाशादेः प्रति
भासकालाबाध्यत्वं प्रातिभासिकं सत्त्वं शु
क्तिरजतादेः तथा च घटः सन्निति प्रत्यक्षस्य
व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम् अ
स्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधेन स्वरूपे
ण किन्तु पारमार्थिकत्वेनैवेति न विरोधः
अनुमानस्य पारमार्थिकत्वेन प्रपञ्चात्यन्ता

69
६९

भाव

विषयकत्वेन घटः सन्नित्यादिप्रत्ययानां व्याव
हारिकसद्घटादिविषयकत्वेनचैतयोर्भिन्न वं
विषयकत्वेनोक्तप्रत्यक्षेणोक्तानुमानबाधोनि
त्याशयः ननुवमप्युक्तमिथ्यात्वस्यासिद्धिः
सर्वस्यापि स्वाश्रयेनतदत्यन्ताभावाभाव
नादवश्यात् किंचमिथ्यात्वलक्षणस्यज्ञान
घटितत्वेभूतलादे योगात् नचाभिमतप
दार्थनिरासइत्युक्तमितिवाच्यम् आश्रिता
श्रयतयाज्ञानस्यापि आश्रिताश्रयेनतदत्य
न्ताभावायोगेनहेतुनो आश्रिताश्रयेनतदत्य वस्तुतः
न्ताभावासम्भवतादवस्थ्यात् किंचमिथ्यात्व स्वाश्रय
लक्षणस्यज्ञानघटितत्वेभूतलादेः स्वाश्रयत्वा त्वेन
ज्ञानाभावकाले = भिमानाभावदशायां घटादेर्मिथ्यात्वाभावप्रस
क्तः अभिमानोपलक्षितत्वविवक्षायां तत्का
लोत्पन्नविनष्टस्य पर्वतगुहान्तर्वर्तिनो मिथ्या
त्वानापत्तिः अपिचनिरुक्तमिथ्यात्वं नसत्यत्व
विरोधि परैरप्यव्याप्यवृत्तिकपिसंयोगादौ
तदभ्युपगमात् अतोस्मिन्पक्षे मिथ्यात्वल
क्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताक
त्वमत्यन्ताभावविशेषणं द्रष्टव्यम् तथाच
पारमार्थिकत्वावच्छिन्नप्रतियोगिताकस्वात्य
न्ताभावसामानाधिकरण्यं मिथ्यात्वम् एत
च्चोपलक्षणं पारमार्थिकाभिन्नत्वं पारमार्थिकात्य
न्ताभाववत्त्वं वा मिथ्यात्वं बोध्यम् तस्मादुप
पन्नं मिथ्यात्वानुमानम्-

70
९०

अस्थूलादिवाक्येत्वन्योन्याभावएव- एवंचस
र्वेषामपिभावानामितिमृषात्वलक्षणं दूरोत्सा
रितम्, अंशिनः स्वांशगात्यन्ताभावस्येत्यत्रभा
नमपिअत्यन्तविरोधान्निरस्तम्, तन्त्वाद्यवयव
भिन्नव्यवहारानापादकत्वादवयविपटादेः-

यत्तुमायावादिनोवेदान्तिब्रुवावदन्ति जीव
निरूपणेद्वेधासम्प्रदायः अविद्याप्रतिबिम्बि
तंचैतन्यंजीवः- अविद्यावाच्छिन्नंवाचैतन्यं
जीवः आद्येउदाहरणम् दर्पणेमुखमय
था- द्वितीयेउदाहरणम्- घटावच्छिन्न
आकाशोयथा तत्रावच्छेदवादेइयंक
ल्पना यथा हस्तानांसमस्त्याभिप्रायेणव
नमित्येकत्वव्यपदेशः तथा नानात्वेनभा
समानानांजीवगताज्ञानानां समस्त्याभिप्रा
येणैकत्वव्यपदेशः इयंसमष्टिरुत्कृष्टोपा
धितयाविशुद्धसत्त्वप्रधानाएतदुपहितंचै
तन्यं सर्वेश्वरसर्वनियन्तृत्वादिगुणकोन्त
र्यामीजगत्कारणमीश्वर इतिव्यपदिश्यते
सकलाज्ञानावभासकत्वात् यः सर्वज्ञः
सर्ववित्, अस्येयंसमष्टिरखिलकारण
त्वात् शरीरं आनन्दप्रचुरत्वात्कोशव
दाच्छादकत्वाच्च आनन्दमयकोशः स
र्वोपरमत्वात्सुषुप्तिः अतएवस्थूलसू

71
७१

त्मवपश्चलयस्यानमितिचोच्यते इति - य
था वनस्यव्यष्ट्यभिप्रायेण वृक्षा इत्यनेक
त्वव्यपदेशस्तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण
तदनेकत्वव्यपदेशः - इन्द्रो मायाभिः पुरु
रूप ईयते - इयं व्यष्टिर्निकृष्टोपाधितया
मलिनसत्त्वप्रधाना एतदुपहितं चैतन्यं प्र
ल्पज्ञत्वादिगुणकः प्राज्ञ इत्युच्यते एका
ज्ञानावभासकत्वात् अनयोः समष्टि
व्यष्ट्योर्वनवृक्षयोरिवाभेदः एतदुपहि
तयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छि
न्नाकाशयोरिवाभेदः - वनतदवच्छि
न्नाकाशयोराधारानुपहिताकाशव
त् अनयोरज्ञानतदुपहितचैतन्ययो
तु राधारभूतं यदनुपहितं चैतन्यं तत्तुरीय
मित्युच्यते शिवमद्वैतं चतुर्थं मन्यन्त इ
ति श्रुतेः इदमेव तुरीयं शुद्धचैतन्यम
ज्ञानादितदुपहितचैतन्याभ्यामविवि
क्तं सन्महावाक्यस्य वाच्यम् विविक्तं स
ल्लक्ष्यमित्युच्यते इति तत्तुच्छम् ईश्वरा
धारभूतानुपहितचैतन्योक्तेर्द्वयोरेव रमूल
एको नारायणः आत्माधारोऽखिलात्म मनाधा
य इत्यादिवाक्यैर्विरोधात् किञ्च वृक्षा २४
णां समष्टिरूपस्य वनस्य वृक्षसत्तानतिर

72

सत्ताकत्वेन वनस्थानीयस्येश्वरस्यापि जीवसत्तानन्त
रसत्ताकत्वादादावेकत्वेनावस्थानं यत्प्रादेकोऽहं बहुस्या
म् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा
णीति संकल्पपूर्वकबहुत्वभवनं जीवभावापत्ति
श्च न संभवति नहि व्यष्टेः पूर्वं समष्टिसम्भवः व्य
ष्टिसमष्ट्यवस्थायाः एव समष्टीरेति व्यवह्रियमा
णत्वात् सेनावनराश्यादिषु तथादर्शनात् –
किन्त्व समष्ट्यवस्थायां जीवास्तिष्ठन्ति चेज्जीवभा
वापत्तिसंकल्पवैयर्थ्यं तदवस्था– न तिष्ठन्ति चे
त् न जायते म्रियते वा विपश्चिदित्यादिनाश्रुत्या
तेषामजत्वप्रतिपादनात् जीवानां प्राचीनक
र्मफलभोगाय जगत्सर्गस्य पगमाच्च अन्य
थाहृष्टिवैषम्यानुपपत्तेः तथाच बादरायणी
यं सूत्रम् वैषम्यनैर्घृण्ये न सापेक्षत्वात्त
थाहि दर्शयति – अ. २ पा. १ सू. ३४ सृज्यमान
देवादिकर्मसापेक्षत्वाद्देवादिविषमसृष्टेः कर्म
सापेक्षत्वं दर्शयति श्रुतिः पुण्यो वै पुण्येन कर्म
णा भवति पापः पापेनेति ब्रह्यनस्त्रस्य अ. २ पा. ३ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४२

न कर्माविभागादिति चेन्नानादित्वात् ३५ सू.

प्राक्सृष्टेः देवैस्त्रान संतिकुतः अविभागा न ५ "सदेवेति श्रुतेस्तदा न कर्म ~~सविभक्तम्~~ अभावादिति चे न द५ न्न – कर्मसंस्कारयोरनादित्वात् –

उपपद्यते चाप्युपलभ्यते च सू. ३६

कर्माभावे सृष्टस्यापि जन्मोपपत्तिः धाता यथापूर्व
मकल्पयदिति श्रुतावप्युपलभ्यतेऽनादित्वम्
तथाच एतैः सूत्रैः देवस्तानां न कर्मप्रवाहस्यानां चा

नादित्वेप्यविभागउपपद्यतेच यत्तस्त्वेत्रज्ञत्वस्तत
दानींपरित्यक्तनामरूपं ब्रह्मशरीरतयापि पृ
थग्व्यपदेशानर्हं अतिसूक्ष्मं तथानभ्युपगमे
कृतनाशाकृताभ्यागमप्रसङ्गश्चोपलभ्यतेचा
मनादित्वं नजायतेम्रियतइति - तदिदं तर्ह्यव्या
कृतमासीत्तन्नामरूपाभ्यांव्याक्रियतेइतिनामरू
पमात्रव्याकरणश्रवणात् क्षेत्रज्ञानांस्वरूपमना
दिसिद्धम् स्मृतावपि प्रकृतिंपुरुषंचैवविद्ध्यना
दीउभावपि - सर्वभूतानिकौन्तेयप्रकृतिंयान्ति
मामिकामिति -
ननुघटेभिन्नेयथाकाशमाकाशः स्याद्यथापुरा
-एवंदेहमृतेजीवोब्रह्मसम्पद्यतेपुनरित्यादिना
घटाकाशदृष्टान्तेनब्रह्मणोजीवभावापत्तिर्गम्य
ते इतिचेत् आकाशदृष्टान्तेनोपहितांशभेदपद
स्तु घटाकाशन्यायेन पूर्वपूर्वोपहितांशपरित्या
गेन तत्तदंशरूपस्यभोक्तुरभावादुत्तरोत्तरो
पहितांशानां पूर्वपूर्वांशानुभूतभोगप्रतिसंधा
नानुपपत्तेः उपलभ्यमानदोषश्च पूर्वपूर्वानुभू
तभोगप्रतिसन्धानविरुद्धः - भोक्तृसन्तत्येक
ताननतामात्रेणप्रतिसन्धाने सौगतमतोन्मज्ज
नेनस्थिरात्मपरित्यागप्रसङ्गश्चात्यन्तानुपप
न्नः अकृताभ्यागमकृतविप्रणाश[illegible]प्रसङ्ग
श्च मोक्षानुपपत्तिश्च कथं स्थिरात्मनुपा
धीनांसर्वदासर्वत्रगमनागमनेनविनष्टोपा

74

धिप्रदेशेषु पाध्यन्तरसंचारस्यावर्जनीयत्वादु
पाधेरेवमोक्षोनत्वात्मनः - श्लोकार्थस्तु यथा
शब्दगुणकोमहत्वकाशप्रदआकाशः घट
काशावस्थायामल्पावकाशप्रदत्वेनवर्त्तमा
नोघटध्वंसे संस्पर्शोवतिष्ठते घटेभिन्नेतु
यथाघटाकाशःस्वान्महावकाशप्रदःस्यात्
तथास्वभावतः सत्यसंकल्पादिगुणकोऽसंसा
रीजीवः संसारदशायामल्पज्ञोऽनीशः तथा
पिजन्ममरणादिदेहधर्मवर्जितोवतिष्ठते - देहेषु
ते - स्थूलसूक्ष्मोपाधिनिवृत्तौपुनर्ब्रह्मसम्प
द्यते - सम्पद्याविर्भावःस्वेनशब्दात् व्या.सू.४पा.
४सू.१ एतत्सूत्रार्थानुरोधादाविर्भूतगुणाष्टकः ब्र
ह्मवादिगुणविशिष्टोभवति ब्रह्मणोमहिमानमवा
प्नोति सचानन्यायकल्प्यते तथाचश्रुतिः स्वेनरू
पेणाभिनिष्पद्यते स उत्तमः पुरुष इति -
ननुनेनजीवेनात्मनानुप्रविश्यनामरूपे व्याकर
वाणीत्यादिभिर्ब्रह्मणएवजीवभावापत्तिः श्रूय
ते इतिचेत् तत्रेदं विमर्शनीयम् संकल्पपूर्व
कजीवभावापत्तिः किं निर्विशेषस्य उत मायो
पाधिकस्येश्वरस्य नाद्यः निर्विशेषस्य संकल्प
शून्यत्वात् न द्वितीयः विशुद्धसत्त्वप्रधानो
पाधिकस्य मलिनसत्त्वप्रधानोपाधिकःस्या
मिति संकल्पो न युज्यते न स्वतन्त्रस्य तस्या
नर्थसंकल्पापत्तिः - संकल्पेपीश्वरः स्वोपाधि

75
৭৫

৭৫

किंच उपाधिभेदे विशिष्टस्यैव नानोपाधियोगोऽस्त्येव यथैकस्यैवा
काशस्य घटकुड्यादिनानायोगः प्र ५ ।

नोऽवच्छेदकभेदेनैकस्यात्मन एव विविधजन्ममर
णाद्यापत्तिः कायव्यूहादाविवेति न सम्भवति व्यव
स्था एकः पुरुषो जायते नापर इत्यादिः न ह्यवच्छे
दकभेदेन कपिसंयोगतदभाववत्येकस्मिन्वृक्षे व्य नैव
वस्था घटते एको वृक्षः कपिसंयोगी अन्यश्चान-
किञ्चैकोपाधिनोपहितस्यात्मप्रदेशस्योपाध्यन्त
रेऽपुनर्बन्धापत्त्या बन्धमोक्षाव्यवस्था तदवस्थैव
यथैकघटपरिच्छिन्नस्याकाशप्रदेशस्यान्यघटयोगाद
घटाकाशाव्यवस्था तद्वत् न च बन्धमोक्षश्रुतिरे
व लौकिकभ्रममनुवादमात्रमिति मोक्षस्यालो
किकत्वात् मिथ्यापुरुषार्थप्रतिपादनेन श्रुतेः
प्रतारकत्वापत्तेश्च - ननु चैतन्यैक्येऽपि तत्तदु
पाधिविशिष्टस्यातिरिक्तताभ्युपगम्य व्यवस्थो
पपादनीयेति चेन्न उपाधेरेव नानात्वेनोपाधिवि
शिष्टोपि नानाभ्युपेयो विशिष्टस्यातिरिक्तत्वेना
नात्मतापातेन शास्त्रान्तराभ्युपगमापत्तेः किंच
बन्धभागिनो विशिष्टस्योद्देशोऽमरणवियोगेन वि
शिष्टनाशान्न मोक्षोपपत्तिः न च सांख्यैरपि
विशिष्टस्य जीवत्वमन्वयव्यतिरेकादितिवा
शुद्धेऽहङ्काराद्विशिष्टस्यैव जीवत्वमुक्तमि
ति वाच्यम् शरणधारकत्वरूपजीवत्वस्यैव
विशिष्टाधेयत्ववचनात् न हि बन्धमोक्ष
व्यवस्थायां विशिष्टाश्रितत्वं तत्र मोक्षका
ले विशिष्टासत्त्वात्-

76
९६

नन्वनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकर
वाणीत्यादिश्रुतिभिर्ब्रह्मणएव जीवभावापत्तिः
श्रूयत इति चेत् तत्रेदं विमर्शनीयम् संकल्पपू
र्वकजीवभावापत्तिः किं निर्विशेषस्य उतमायो
पाधिकस्येश्वरस्य नादिमः निर्विशेषस्य सङ्क
ल्पशून्यत्वात् न द्वितीयः विशुद्धसत्त्वप्रधानो
पाधिकस्य मलिनसत्त्वप्रधानोपाधिकः स्या
मिति सङ्कल्पो न युज्यते नच उन्मत्तः स्वस्यान
र्थसङ्कल्पयति संकल्पेपीश्वरः सोपाधि

77

परित्यागेनान्यथाभावाद्यदीश्वरः तर्हि निर्विशे
षत्वं किं न स्यात् नच विद्योपाधिविशिष्ट
स्यैवाविद्योपाधिकत्वं सम्भवति विद्यावि
द्ययोः साङ्कर्यप्रसंगात् किञ्च अन्तः प्र
विष्टः शास्ता जनानां सर्वात्मा इत्यनेन
स्वस्य स्वयमेवात्मा शास्ता च अग्निरात्मा
नं दहतीतिवदत्युक्तानुपपन्नः अथच
एषएवासाधुकर्मकारयति यमधो नि
नीषतीति सर्वज्ञोऽपि जीवभूतस्य स्वस्य न
रकानुभवहेतुभूताऽसाधुकर्मकारयि
ता- पापकर्मप्रवृत्तिनिवारणाशक्तोऽपि
नियन्तेति सर्वमसमञ्जसमेव स्यात्
किंच मुक्तिर्हित्वान्यथारूपं स्वरूपेण
व्यवस्थितिरित्यत्र संसारावस्थाव-
स्थितस्य संकल्पपूर्वकजीवत्वापत्तिः
पुनस्तदवस्थावस्थितिरेव मोक्षः तथाचे
श्वरस्य जीवभावापत्तेः पुनरीश्वरत्वाप
त्तिरेव मोक्षः एवं सति निर्गुणमोक्षवा
दो दत्तजलाञ्जलिः - तथाच शारीरकसू
त्रम् इतरव्यपदेशाद्धिताकरणादिदोष
प्रसक्तिः अ.२ पा.१ सू २१ अस्यार्थः
जगतो ब्रह्मानन्यत्वं प्रतिपादयद्भिस्तत्त्वमसि
यमात्मा ब्रह्मेत्यादिभिर्जीवस्यापि ब्रह्मत्वेन

78

न्यत्वं व्यपदिश्यते इत्युक्तं तत्रेदं चोद्यते यदी
तरस्य जीवस्य ब्रह्मभावोऽमीभिर्वाक्यैर्व्यप
दिश्यते तदा ब्रह्मणः सार्वज्ञसत्यसंकल्प
त्वादियुक्तस्यात्मनोऽहितरूपजगदकरण
माहितरूपजगत्करणमित्यादयो दोषाः प्र
सज्येरन् आध्यात्मिकाधिदैविकाधिभौ
तिकानन्तदुःखाकरं जगत् चेदृशे स्वानर्थे न ब्रह्मणो
स्वाधीनो बुद्धिमान्प्रवर्त्तते जीवाद्भेदवादि
न्यः श्रुतयः जगद्ब्रह्मणोरनन्यत्वं वदन्ता
त्थैवं परित्यक्ताभेदसत्यत्वन्यत्वासिद्धेः
औपाधिकाभेदश्रुतयः स्वाभाविकाभे
दविषयाश्चाभेदश्रुतय इति चेन्न तत्रेदं
वक्तव्यम् स्वभावतः स्वस्मादभिन्नं जीवं किं
जगत्कारणं ब्रह्म जानाति न वा नान्त्यः सार्व
त्वहानेः नाद्यः स्वाभिन्नस्य जीवस्य दुःख
सुखमिति जानतो ब्रह्मणो हिताकरणादि
दोषप्रसक्तेरनिवार्यत्वात् – ननु मायाभा
सेन जीवे शोकरोतीति जीवेश्वरयोर्ब्रह्म
प्रतिबिम्बत्वं श्रूयते अतो बुद्धिप्रतिबिंबि
तो जीवो मायाऽभास ईश्वर इति चेन्न निर्वि
शेषोपलब्धिमात्रस्य ब्रह्मणः प्रतिबिम्बद
र्शनं शक्यते वक्तुम् श्रुतिविरुद्धत्वाच्च ए

79

कारणांकरणाधिपाधिपः नचास्यकश्चिज्जनिता नचाधिपः- नजायतेम्रियतेवाविपश्चित्-

नित्यानांजीवानां करणकलेवरदानञ्चवणा.

विरोधोपि तथाच भागवते वेदस्तुतौ बुद्धी

न्द्रियमनः प्राणान्जनानामसृजत्प्रभुः मा

त्रार्थंचभवार्थंच आत्मनेऽकल्पनायच-

अपवर्गस्तु मायाप्रभासेन अयथात्म्येन

जीवेशो करोति उभयोस्तत्वे वैपरीत्यंजनय

ति- दृश्यतेहि उक्तार्थे आभासद्वयोगः देहा

भासः धर्माभासः किंतद्वैपरीत्यम् उच्यते

अजोनित्यः शाश्वतोयमात्माप्यनीशः अनी

शयाशोचतिमुह्यमान इत्याद्युक्तेजीवतत्वे दे

हात्मभ्रमं स्वतन्त्रात्मभ्रमञ्चोत्पादयति तेन

देहोहं ईश्वरोहमहंभोगीतिवक्ता रोभवन्ति-

तथा पतिंविश्वस्यात्मेश्वरं शाश्वतंशिवमच्यु

तम्- योमामजमनादिंच- आत्मोधारोखि

लाश्रय इत्युक्ते ईश्वरतत्वे कार्यत्वान्याधार

त्वमायोपाधिकत्वावधिं जनयति - तथाचगी

यते- अव्यक्तंव्यक्तिमापन्नमिति- अवजा

नन्तिमांमूढाः- परंभावमजानन्तः इति-

तत्वाभासः प्रतिबिम्बार्थे वसिष्ठः सएवात्रा

त्रीकार्यः हन्ततर्हि अग्रसदेवेदमग्रआसीत्

वीरहाविषमः मृन्यदत्यत्रासतमृन्यशब्दा

धर्माधर्मका
र्मभोक्तारव्य
सर्वाथयः

80

८०

र्थ्यां प्रसिद्धार्थेन अन्यमेव तत्त्वमिति विज्ञायते
कुतो नाङ्गीक्रियते तदनङ्गीकारे पञ्चकारणं तदे
वाचादिसमानम् न च जीवो यदि भिन्नस्तर्हि
कथं तत्त्वमस्यादिवाक्यैरेकत्वव्यपदेश इति चे
न्न उभयथा व्यपदेशात् तथा च शा. अ. २ पा.
३ सू. ४३ अंशो नानाव्यपदेशादन्यथा चा
पि दाशकितवादित्वमधीयत एके - अस्यार्थः
जीवो ब्रह्मांशः कुतो नानाव्यपदेशात् - अन्यथा
चापि एकत्वेन व्यपदेशादपि - उभयथा हि
व्यपदेशो दृश्यते नानाव्यपदेशस्तावत् स्र
ष्टृत्वसृज्यत्वनियन्तृत्वनियाम्यत्वसर्वज्ञत्वा
ज्ञत्वस्वतन्त्रत्वपरतन्त्रत्वशुद्धत्वाशुद्धत्वकल्या
णगुणाकरत्वतद्विपरीतत्वपतित्वशेषित्वशे
षत्वादिभिर्दृश्यते अन्यथा च अभेदव्यप
देशोऽपि तत्त्वमसि अयमात्मा ब्रह्मेत्यादिभिर्दृ
श्यते - अपि च (दाशकितवादित्वमधीयते
एके) एके आथर्वणिकाः ब्रह्मदाशाः ब्रह्मेद वेमे×
शाः ब्रह्मेवेमे कितवा इति श्रुते ब्रह्मणो दाशकि
तवादित्वमधीयते इति ततश्च जीवव्यापित्वे
नाभेदो व्यपदिश्यते इत्यर्थः एवमुभयव्यप
देशमुख्यत्वसिद्धये जीवोऽयं ब्रह्मांश इत्य
भ्युपगन्तव्यम् न च भेदव्यपदेशानां प्रत्यक्षा
दिसिद्धार्थपरत्वेनान्यथासिद्धिः ब्रह्मसृज्यत्व त्वम्×
तन्नियाम्यत्वतच्छरीरत्वतच्छेषित्वे तदाधा

रत्वतत्यास्त्यत्वतत्संशय्यैत्वतदुपासकत्वतत्प्रसा
दलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थोऽनुत्वा
दिकृमोजीवब्रह्मणोर्भेदः प्रत्यक्षादि गोचर
त्वेनान्यथासिद्धः ऽप्रतोजगत्सृष्ट्यादिवादि
नीनां श्रुतीनां प्रमाणान्तरसिद्धभेदानुवादे
नतन्मिथ्योपदेशपरत्वम् ऽअपिच स्मर्य्य
ते ममैवांशोजीवलोकेजीवभूतः सनात
न इति - मद्विभूतिभूतोमदंशरूप - स्वभा
वतः सत्यसङ्कल्पादिगुणाकः सकाम्यदना
दिकर्मरूपाविद्यावेष्टनतिरोहितस्वरू
पोऽतिसंकुचितज्ञानैश्वर्य्योजीवलोकेसं
सारेवर्त्तमानः तथाचश्रुतिः तइमेसत्य
कामाऽअनृतापिधाना इत्यादि - जीवानां
कर्मप्रवाहानादित्वंतु नकर्माविभागादि
तिचेन्नानादित्वात् ३५ उपपद्यतेचाप्युप
लभ्यतेचेतिसूत्राभ्यामवसेयम् स्मृतिश्च
ऽअनादिकालसंसुप्तः संसारपदवींगतः -
कवस्त्वे नन्वेकदेशवाचीत्यंशशब्दः जीवस्यब्रह्मै
कदेशत्वे तद्गतादोषाब्रह्मणोभवेयुः न
वाब्रह्मखण्डोजीव इत्यंशकोपपत्तिः स्व
रूपानर्हत्वाद्ब्रह्मण इत्याशङ्कायां ब्रा॰ऽअ॰२पा॰
३सू॰४६ प्रकाशादिवन्नैवंपरः - ऽप्रस्यार्थः तु
तुशब्दश्चोद्यंव्यावर्त्तयति प्रकाशादिवज्जी

82

वः परमात्मनोंऽशः यथाग्न्यादित्यादेर्भास्वतः प्रभारूपः प्रकाशोंऽशो भवति यथा गवां च शुक्लकृष्णानां गोत्वादिविशिष्टानां गोत्वादिविशेषणान्यंशाः यथा वा देहिनो मनुष्यादेर्देहोंऽशः तद्वदेकवस्त्वेकदेशत्वं ह्यंशित्वं विशिष्टस्यैकवस्तुनो विशेषणमंश एव-
तथा च विवेचका विशिष्टे वस्तुनि विशेषणांशोऽयं विशेष्यांशोऽयमिति व्यपदिशन्ति - विशेषणविशेष्ययोरंशांशित्वेपि स्वभाववैलक्षण्यं दृश्यते एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वे स्वभावभेद उपपद्यते- तदिदमुच्यते नैवं पर इति
तर यथैव हि प्रभाया: प्रभावान्नर्थान्तरभूतः तथा प्रभास्थानीयादंशाज्जीवादंशी परोप्यर्थान्तरभूत इत्यर्थः एवं जीवपरयोर्विशेषणविशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशाः प्रवर्तन्ते - अभेदनिर्देशास्तु पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते-
तत्त्वमसि-अयमात्मा ब्रह्मेत्यादिषु तच्छब्दवत् ब्रह्मशब्दवत् त्वमयमात्मेति शब्दोपि जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वात् अयमर्थः प्रागेव प्रपञ्चितो स्माभिः नन्वसतासौ सत्यतदास्पत्रोभ

83

८०

काशमेकरूपस्वभावव्यवस्थाप्रतिपादनपरत्वा
त् वासुपर्णेतिश्रुत्यन्तरैकार्थ्यात् ब्रह्मण आत
पत्वाभावात्तत्पदवाच्यभास्वरत्वमेवातपशब्दार्थः
जीवस्य छायात्वाभावेऽपि छायावदभास्वरत्वमेव
छायाशब्दार्थो भवितुमर्हति- अस्थूलमनण्व
ह्रस्वमदीर्घमलोहितमच्छायमिति छायाप्रति
षेधश्रवणात् तस्मान्न छायातपाविव्यत्र छाया
शब्दो ब्रह्मप्रतिबिम्बपरः नन्वेक एव हि भूता
त्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृ
श्यते जलचन्द्रवत् १ आकाशमेकं हि यथा
घटादिषु पृथग्भवेत् तथात्मैको ह्यनेकस्थो
जलाधारेष्विवांशुमान् २ इत्यादिवाक्यान्तरो
धेन नगरकल्याकेदारादिनानाव्यक्तीनां चन्द्रप्र भि
तिबिम्बानामिव मायाहङ्कारबुद्धिकार्याभिव्य
क्तब्रह्मच्छायानामीश्वरजीववृत्तिज्ञानानामौ
पाधिकभेदस्यव्यक्तत्वेन तन्निवन्धनो यं ज्ञा
त्रोपावजीवीशानीशावितिभेदव्यवहार इति चे
न्न परिच्छिन्नव्योमादिविलक्षणवस्तुनश्छाया
यासम्प्रत्ययसम्भवादलोहितामच्छायश्रवणा
च्च काल्पनिकछायाङ्गीकारे जीवेश्वरयोरवि
मिथ्यात्वप्रसङ्गात् तदभ्युपगमे आत्मा वारे द्र
ष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः यदा तद्वि
दुरमृतास्ते भवन्तीत्यादिविधीनामर्थवादानां
चानर्थक्यप्रसङ्गात् तदभ्युपगमे ब्रह्मणो मानान
न्तराविषयत्वात् स्वात्मभवस्यापि मिथ्याभूतजी
वानतिरिक्तावभासकत्वात् यावत्प्रमाणप्रमेयमिथ्यात्व
वादिनां कथमप्युपपत्तेः किं च प्रतिबिम्बवादे न [illegible]
धिकार

89

साद्दिष्य वस्याविस यटते - ४८

~~धत्रके चित् उपाधिभेदेने तत्त्वाधिविशिष्ठस्येतिवदन्ती न~~
ब्रह्मभागिनो विशिष्टस्य च निशेषरा वियोगेन विशिष्ट
नाशान्न मोक्षोपपत्तिः न च सांख्ये रवि-विशिष्ट स्य जीव
त्वमन्वयव्यतिरेकादिति वाच्यम् तत्र अहङ्कार विशिष्टस्ये
व जीवत्वमुक्तम् इति वाच्यम् प्राणधारकत्वरूपजीव
त्वस्येव विशिष्टाद्येयाचवचनात् - न हि बन्धमोक्षव्य
वस्थाया विशिष्टाश्रितत्वं तत्र मोक्षकाले विशिष्टा
सत्त्वात् - नचैकस्येवात्मनः कार्यकारणोपाधिप्रयु
ति विम्बानि जीवेश्वराः प्रतिविम्बानां चान्योन्यभेदा
ज्ज्ञाना-धिल व्यवस्थोपपत्तिरिति वाच्यम् भेदाभेद
विकल्पासहत्वात् - विम्बप्रतिविम्बयोर्भेदे प्रतिविम्ब
न स्याचेतनत्वं या भोक्तृत्वबन्धमोक्षाद्यनुपपत्तिः जीवब्र
ह्मणोर्भेदरूपतन्सिद्धान्तहानिश्च जीवेश्वरयोभिन्नस्या
त्मनोऽप्रामाणिकत्वं च - अभेदे तु धर्मसाङ्कर्यापत्ति
रिहारः - भेदाभेदाभ्युपगमे तु नास्ति सिद्धान्तहानिः भे
दाभेदविरोधश्च अस्मन्मते च भेदोऽविभागलक्ष
णो भेदश्चान्योन्याभावस्तयविरोधः - स्यादेतत् वि
म्बप्रतिविम्बादिभेदं परिकल्प्यश्रुता बन्धमोक्षव्य
वस्था कल्पितेत्येवास्माभिरुच्यते न तु परमार्थतो
विम्बप्रतिविम्बभावस्तयोर्भेदो बन्धमोक्षादिकं चे
ष्यते मेवम् एवं सति बंधमोक्षनिरूपकश्रुतिग
णस्य भेदश्रुतिगणस्य च बाधापेक्षया केवलाभेद
श्रुतिगणस्यैवाविभागपरतयैव संकोचो लाघवा
द्युज्यते श्रुतिस्मृत्यन्तरेषु विभागस्य सिद्धत्वाच्च
एवमेकत्वेन सर्वेतो वर्तमानस्यात्मनो जन्ममरणा
दिरूपविरुद्धधर्मप्रसङ्गो न युक्तः नन्वनिर्धर्मकस्य
न कथं जन्ममरणबन्धमोक्षादि विरुद्धधर्मसाङ्कर्य

१०

~~भावधर्माणां~~ ×

मापद्येत धर्माणां सर्वेषामुपाधिनिष्ठत्वाभ्युपगमादि
ति चेन्न संयोगवियोगभोगाभोगरूपतयोक्तधर्मा
णामुभयरूपत्वस्वीकारात् परिणामरूपधर्माणामेव
पुरुषेष्वेति सिद्धत्वात् यथा स्फटिके लौहित्यनीलि
मत्वादिधर्माणामारोपितानामपि व्यवस्थास्ति तथा रादि
पुरुषेष्वपि बाह्यधर्माणां सुखदुःखादीनां शरीरध
र्माणां च शास्त्रप्रत्यक्षनियत्वादीनामारोपितानामपि
व्यवस्थास्ति शास्त्रेषु यथा विष्णुपुराणे यथैकस्मि
न्घटाकाशे रजोधूमादिभिर्युते न च सर्वेत्र युज्यन्ते
एवं जीवाः सुखादिभिः २ अन्यधर्मत्वे विसुखादी तन्मादि
नां धर्माणामारोपात्मरूपेव्यवस्थां न सिध्यति आरो व्यवस्था
पाधिष्ठानरूपस्यैकत्वात्- आकाशस्यैकत्वेपि घ वदेव ×
टावच्छिन्नाकाशानां घटभेदेन भिन्नतयौपाधिकध
र्मव्यवस्था घटते- आत्मत्वजीवत्वादिकन्तु नोपाध्य
वच्छिन्नस्य- उपाधिविनाशे घटाकाशनाशवत्
तन्नाशेन जीवो न म्रियत इति श्रुतिविरोधप्रसंगात्
किन्तु केवलचैतन्यस्य आत्मत्वजीवत्वादिकम्-
भेदव्यपदेशाच्चान्य इत्यादिभिः पूर्वोक्तसूत्रैर्भेदकथ
नात् अत आधुनिकानामवच्छेदप्रतिबिम्बवादा
अपसिद्धान्ता एव- एकएव हि भूतात्मेति श्रुतिर्यन्नित्यः आद्याः
सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः एकः स भिद्य
ते शक्त्या मायया न स्वभावतः इत्याद्याः स्मृतयश्च
एकरूपत्वपराः न त्वखण्डत्वपराः- आत्मैक्यप्रतिपाद
कश्रुतिस्मृतिष्वैकादिशब्दा अभेदैकरूपतामात्रपराः
भेदादिशब्दाश्च वैधर्म्यलक्षणभेदपराः- एकएवा
त्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीत

91

८५

मूव इत्यादिसांशदृष्टान्तश्रुतीनां न्यायानुग्रहेणाव
लम्बत्वात् तथा च स्मर्यते यस्य सर्वात्मकत्वेऽपि खव
त्तत्तेनैकपिण्डता इति ब्रह्ममीमांसायान्तु नित्या
भिव्यक्ते परमेश्वरत्वे तन्त्रेऽन्येषां लयरूपाविभागेना
प्यद्वैतमुक्तम् अविभागो वचनादिति सूत्रेण-
अथवा प्रलयकाले ब्रह्मविजातीयं सर्वमेवासत् अ
र्थक्रियाकारित्वाभावात् ब्रह्मणां कौटस्थ्येनार्थक्रि
यैवाप्रसिद्धा अतः सर्गकाल एव प्रलयेऽपि सत्त्वम् अ
तत्तदात्मनां विजातीयद्वैतराहित्यम् तथा सर्गकाले
ऽपि कूटस्थत्वरूपपारमार्थिकसत्त्वेनान्यत्वेति विजा
तीयद्वैतराहित्यात् सर्गकालीनाद्वैतश्रुतयोऽप्युपप
न्नाः नत्वोन्मनस्कात्ववदेकरूपत्वमपि नाना रूपता
प्रत्यक्षेण विरुद्धं तत्कथमुक्तं नाद्वैतश्रुतिविरोधो
जातिपरत्वादिति कापिलेसूत्रे जातिपरत्वादिति
चेन्न अविवेकिदृष्टौ बहुरूपेषु रूपभेदः अपरेर
दर्शनेऽपि ज्ञानिभिरेकरूपत्वस्य दर्शनात् - सू. कौ.
नोः [illegible]त्याद्दृश्याचक्षुरनामनुपलम्भः अ. प्र. १५६
अखण्डाद्वैतं तु नास्त्येव सत्त्वे कामदेवादेर्मोक्षोऽसि
बन्धस्येदानीमप्यनुभवसिद्धत्वात् सत्स्यात् न
च बन्धमोक्षावुपाधेरेवेति वाच्यं श्रुतिस्मृतिसिद्धान्त
विरोधात् - दुःखं मा भुञ्जीयेति कामनादर्शनेन पुरु
षमोक्षस्यैव मोक्षाख्यपरमपुरुषार्थत्वाच्च उपाधे
तादर्थ्ये दुःखहानस्य च परमपुरुषार्थत्वानुपपत्ताद
नx वदिति - यदप्याधुनिकैर्मायावादिभिरुच्यते अद्वै
तश्रुतिविरोधाद्बन्धमोक्षसृष्टिसंहारादिश्रुतयो
बाध्यन्त इति तदप्यसत् मोक्षाख्यफलस्याविम्र
वर्णकालत्वाभावनिश्चये श्रवणोत्तरमननादिवि
धेरननुष्ठानलक्षणाप्रामाण्यप्रसङ्गात् प्रपञ्चोल्ल
र्गतस्य वेदान्तस्याप्यद्वैतश्रुत्याबाधे वेदान्तावगते

94

२४
५

मेवा
यत्तु जीवघातकमध्यपतितनास्तिक्य वर्णानुयघातकमशयः क्षिणा
इतीव स्फुरणम् ४

यद्वैते पुनः संशयापत्तेस्स्यात्प्रवाक्यस्यज्ञाग्रजिवाधे
न वाक्यार्थे पुनः संशयवत्। किञ्च मिथ्यादृष्टिर्नास्ति
कर्मत्वमनुशासनाद्धर्मादिमुस्यापवन्मिथ्यादृष्टयोवो
द्धव्यभेदा एव। सा दृष्टिकशब्देन ग्रन्थस्याविद्यकृता
यामन्ते रम्भुपगमात्। न च वामदेवादेरपि परमलोक्षो
न ज्ञानस्याभ्युपगम इति चेन्माशङ्किष्ठाः अनना
दिकालादद्यपर्यन्तं यदि कस्यचिदपि मोक्षो न जातस्त
दा भविष्यत्कालोपि मोक्षशून्य एव स्यात्। तत्रानुमान
म् कस्यचिदपि बन्धात्यन्तोच्छेदो नास्ति सर्वदा बन्ध
त्वाद् नीमानकालिकबन्धवत्।
आत्मनां मोक्षकाले संसारिदशायांचैकरूपत्वम् न तु
क्रमम् बहुरूपवद् बाभासितमाययावद्रूपत्वया। इममाले
णोक्षस्याममाहमपि निबध्यते।
जगदाख्यमहास्वप्ने स्वप्नान्स्वप्नान्तरं व्रजन्। रूपंत्यज
ति नो शान्तं ब्रह्मशान्तत्वं हितम् इति च।
पुरुषस्य साक्षित्वं न बुद्धेरेव साक्षान्तं व्यधानात् साक्षाद्दृष्ट्
त्वं चाव्यवधानेन दृष्टृत्वम्। अतो बुद्धेः साक्षी अन्येषां
तु द्रष्टृमात्रम्। ज्ञानक्रियामकक्षाधीकारतास्थानीयः
प्रतिबिम्बरूपएव सम्बन्धो न तु संयोगमात्रम्।
पुरुषः सदैव दुःखात्यन्तबन्धशून्यः दुःखादेर्बुद्धिपरि
णामत्वात् पुरुषार्थस्तु दुःखभोगनिवृत्तिः प्रतिबिम्ब
रूपदुःखनिवृत्तिर्वा। पुरुषोऽकर्ता च। पुरुषस्य
कर्तृत्वं क्वचिदुच्यते तदुपरागात् बुद्धेश्चाचित्ता
साचित्सान्निध्यात् तदुभयं न वास्तवम्। यथान्ययः
संयोगविशेषात्परस्परधर्मव्यवहार औपाधिकः य
थावानल सूर्ययोः संयोगादन्योन्यधर्मारोपस्तथैव
बुद्धिपुरुषयोः तदुक्तम्। तस्मात्तत्संयोगादचेतनं चेत
नावदिवलिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासी
नः। ~~[illegible] पंक्ति [illegible]~~

स्यपुनर्जन्मन विद्यत इत्यादिवाक्येष्वेकरूपार्थवा
च्यत्वात् अन्यथाऽवस्थात्रयेऽप्यात्मन एकता
२।५ मात्रज्ञानेन स्थानत्रयव्यतीतो[illegible]द्बोधाया अवस्था
त्रयाभिमाननिवृत्तेरसम्भवात् तथैकरूपतामप्रतिपा
दनेनैव निखिलोपाधिविवेकेन सर्वात्मतां स्वरूप
बोधनसम्भवाच्च न ह्यन्यथा निर्धर्म्मकमात्मस्वरू
पं विशिष्य लक्षणादिशब्देन साक्षात्प्रतिपादयितुं
शक्यते शब्दानां सामान्यमात्रगोचरत्वात् अत एव लक्षणपर्य
न्तेष्वात्मन एकरूपत्वेन प्रतिपादिते तदुपपत्त्यर्थं शिष्यः स्व
यमेव तावद्विवेचयति यावन्निर्विशेषे शब्दगोचरे स्वरूपे प
र्यवस्यतीति ततश्च निःशेषाभिमाननिवृत्त्या कृतकृत्यो भव
ति यदि पुनरद्वैतवाक्यान्यखण्डतामात्रपराणि स्युस्तर्हि ते
भ्यो नाभिमाननिवृत्तिः सम्भवति आकाशे विविधशब्द
दर्शनेऽप्यात्मनि सुखदुःखतदभावादीनामवच्छेदकभेद
रूपपत्तेः एकस्यैव वाक्यस्याखण्डत्वबोधम्युभयपरत्वे
च वाक्यभेदोऽखण्डतापरकल्पनायां फलाभावश्च एवं
धर्म्यैक्यज्ञानेनैव सर्वाभिमाननिवृत्तेः अतोऽद्वैतवाक्यानि
नाखण्डतापराणि न्यायानुगृहीतबलवतीभिर्भेदग्राह
कश्रुतिस्मृतिभिर्विरोधाच्च किन्त्वद्वैतधर्म्मलक्षणाभेद
पराण्येव साम्यबोधकश्रुतिस्मृतिभिरेकवाक्यत्वात्
सामान्यापत्तिरिति बृहस्पतेश्च तत्र साम्यश्रुतयः यथो
दकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजा
नत आत्मा भवति गौतम। निरञ्जनः परं साम्यमुपै
तीत्याद्याः स्मृतयश्च ज्योतिरात्मनि नान्यत्र स
र्वभूतेषु तत्समम् स्वयं च शक्यते द्रष्टुं सुसमाहितचे
तसा। यावानात्मनि वेदात्मा तावानात्मा परात्म
नि य एवं सततं वेद जन[illegible]स्योपि नश्यति २
इत्याद्याः उक्तश्रुतिस्मृतिभिर्मोक्षदशायामपि भेदघटित
साम्यवचनात् स्वरूपभेदोऽप्यात्मनामस्तीति सिद्धम्

अवैधर्म्याभेदपरत्वंचास्मन्मते विष्णुरहं शिवोऽहमित्या
दिवाक्यानामनन्वयम् - न तु तत्त्वमस्यहंब्रह्मास्मीत्या
दिवाक्यानामपि - न च सांख्यमते प्रलयकालिकस्य
मूलात्मन एव तदादिपदार्थतया नित्यशुद्धबुद्धमु
क्तस्त्वमसीत्यादियथाश्रुतस्य तादृशवाक्यार्थत्वात् -
यदि तु सर्गाद्युत्पन्नब्रह्मरूपी नारायणाँख्य एव तत्पद यणाख्य=
र्थस्तदा तत्त्वमसीत्यादिवाक्यानामप्यवैधर्म्यार्थ
कतैवास्तु - न तु प्रयोजनाभावान्नभेदपरत्वंश्रुती
नांसम्भवतीति चेन्न मोक्षोपपादनस्यैव प्रयोजन
त्वात् सृष्टिसंहारयोः प्रवाहरूपेणानुच्छेदात्त
स्यैक्ये मोक्षानुपपत्तेः - अथैवमप्यात्मभेदस्यलो
कसिद्धतयाननन्यपरत्वंश्रुतीनांघटत इति मेवम्
लाघवतर्केणाकाशवदेकत्वस्यानुमानतः प्रस
क्तस्य श्रुत्यादिभिर्निषेधात् - स्वपरचैतन्ययोर्भे
दस्य चाप्रत्यक्षत्वात् देहादिष्वेवानुभवात् - यएत
स्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवतीत्यादि
भेदनिन्दानु वैधर्म्यविभागान्यतरलक्षणभेदपरा
इति न चैवंमुक्तानां मुक्तानां प्रतिबिम्बाविच्छेदश्रु
तीनां कागतिरिति चेदुच्यते अनेकतेजोमया
दित्यमण्डलवत् अनेकात्ममयमपि चिदादित्य
मण्डलमेकरसमविभक्तमेकपिण्डीकृत्य तस्य
किरणवत् स्वांशभूतैरसङ्ख्यपुरुषैरसंख्यो
पाधिष्वसंख्यविभाग एव प्रतिबिम्बादिदृष्टान्तैः
प्रतिपाद्यते विभागलक्षणान्यत्वस्य वाचारम्भ
णमात्रत्वंबोधयितुं नपुनरखण्डत्वम् -
वाऽप्यर्थैकंभवनं प्रविष्टो रूपंरूपं प्रतिरूपो ब

93
ब्र
८१

(व्यानतिरिक्तावभासकत्वाच्च यावत्प्रमाणप्रमे
यमिथ्यात्ववादिनां कथायामधिकारात्प्रयुक्तेः)
जलचन्द्रदृष्टान्तोपदेशानां ब्रह्मणः शरीरभू
तचिदचिद्गतदोषास्पर्शप्रतिपादनपरतयोप
पत्तेः वाक्यान्तरोपदिष्टजीवेश्वरस्वरूपस्वभा
वैयथार्थ्यबाधकत्वाभावात् श्रूयते चान्त
र्यामिणो निर्देशत्वम् - एको देवः सर्वभूतेषु
गूढः - अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं
प्रतिरूपो बभूव एकस्तथा सर्वभूतान्तरा
त्मा रूपं रूपं प्रतिरूपो बहिश्च - सूर्यो यथा
सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोक
दुःखैः सबाह्यैः - अन्यथा आकाशमेकं हि
यथा घटादिषु पृथग्भवेदिति दृष्टान्तान्तरो
पादानवैयर्थ्यप्रसङ्गात् ननु सितनीलादि
भेदेन यथैकं दृश्यते नभः भ्रान्तदृष्टिभिरा
त्मापि तथैवैकः पृथक्पृथगित्याद्यात्मै
कत्ववादाः कथमिति चेत् [illegible]ादिति एवं लक्ष्या ।
ब्रूमः भेदशब्दो हि वैलक्षण्यवचनो लोके
प्रसिद्धः स्वसदृशो बुलाकस्य कश्चिद्भेदोऽस्तीति
व्यवहारो भवति तथात्मनामपि नरपशुप्रभृतिर्य
भेदभिन्नशरीरवर्तिनां शरीरसम्बन्धमपो
ह्य केवलतत्त्वरूपेण निरूप्यमाणानां परस्पर

त: परमात्मत्वमिव न किञ्चिदपि वेलक्षण्यमस्तीति अनेनाभिप्रायेणैकत्ववादा नानात्वनिषेधाश्च- तदभिप्रायकमेवेदं भगवद्वचनं विद्याविनयसम्पन्न इत्यादि निर्दोषं हि समं ब्रह्मेत्यादि च प्रकृतिसंसर्गदोषविमुक्ततयात्मसमानत्वमुक्तं हि ब्रह्म-
नारायणोपनिषदि अथ पुरुषो ह वै नारायणो ऽकामयत अथ नित्यो ह वै नारायणः ब्रह्मा सर्वभूतात्मा एष अन्तर्यामी एको देव एको नारायणः परं ब्रह्म आत्मा नारायणः परः
सुबालोपनिषदि किं तदासीत् नैवेह किञ्चनाग्र आसीत् मूलमनाधारमिमाः प्रजा यत्ते दिव्यो देव एको नारायणः श्वेताश्वतरोपनिषदि स विश्वकृद्विश्वविदात्मयोनिः- सः कालकालो गुणी सर्वविद्यः- प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः- देशतः कालतो व्याप्तेर्मोक्षदत्वतश्चैव च- हरेर्विभूतिमात्रत्वं केवलं समभावितम्- स्कान्दे बन्धको भवपाशेन भवपाशाच्च मोचकः कैवल्यदः परं ब्रह्म विष्णुरेव सनातन इत्यादिभिः निखिलहेयप्रत्यनीककल्याणगुणाकरत्वं नारायणस्यावगम्यते सद्ब्रह्मात्मशिवादिशब्दैर्हि तत्तद्ब्रह्मवाक्यस्थैर्नारायणशब्देन विशे

97.

श्रितास्तमेवगमयन्ति ततोनान्यद्भूतचेतन
मिति नचात्मावाइदमग्रआसीदिति सृष्टेः
प्रागेकत्वावधारणात्कथंसूक्ष्मचिदचिद्विशिष्ट
स्यकारणत्वमुच्यत इतिचेन्न यतोवाइमा
निभूतानिजायन्ते येनजातानिजीवन्ति यत्प्र
यन्त्यभिसंविशन्तीति परिणतस्थूलाका
राणां सूक्ष्माकारापत्त्या स्थूलनिवृत्तिः प्रति
पाद्यते नतुस्वरूपनिवृत्तिः - अक्षरंतम
सिलीयते तमः परे देवएकीभवतीतिश्रु
तौ तमःशब्दवाच्यायाः प्रकृतेः परमात्म
न्येकीभावश्रवणात् - पृथग्ग्रहणरहित
त्वेनवृत्तिरेकीभावः सएवलयशब्दार्थः
यथावृक्षेलीनाः पतङ्गावनेलीनाः सार
गाः अतएव तमसागूढ - - - मासी
त् - अस्मान्मायीसृजते विश्वमेतत्तस्मिं
श्चान्योमाययासन्निरुद्ध इति सृष्टस्व
रूपेणचेश्वरस्यान्तःप्रविष्टः - अन्यथा शा
स्त्रजनानां सर्वात्मा इत्यनेन स्वस्यस्वएवा
त्मा शास्त्राचार्यान्निरात्मानं ददतीतिवदत्य
न्तानुपपन्नः [redacted] इत्यादि जगदीरितम्

व्याससूत्रम् अधिकंतुभेदनिर्देशात्
अ. २ पा. १ सू. २२ अर्थः तुशब्दः पक्षंव्या
वर्तयति आध्यात्मिकादिदुःखयोगार्हात्प्र
त्यगात्मनः अधिकं अर्थान्तरं ब्रह्म

[illegible]

कुतः भेदनिर्देशात् परंब्रह्मजीवाद्भिन्नत्वेन नि
र्दिश्यते श्रुतिषु - य आत्मनि तिष्ठन् - इत्यात्मा
नं वेद रिनारं चेत्याद्याः श्रुतयः पूर्वं दर्शिताः -
यो ऽन्तरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यम
क्षरो न वेद एष सर्वभूतान्तरात्मा ऽपहतपा
प्मा दिव्यो देव एको नारायणः इत्याद्याश्च श्रु
तयः सन्ति

विवक्षितगुणोपपत्तेश्च अ. १ पा. २ सू. २

अनुपपत्तेस्तु न शारीरः अ. १ पा. सू. ३

अर्थः - विवक्षितगुणाः मनोमयः प्राणशरीरो
भारूपः सत्यसंकल्पः आकाशात्मा सत्यका
मः सर्वकर्मा सर्वगन्धः सर्वरसः इत्याद्याः प
रमात्मन्येवोपपद्यन्ते - जीवात्मन्येतेगुणा न
- ननु सक्रतुं कुर्वीतेति विहितमुपासनं त
त्रायं गुणविधिः अप्राप्ताच्च गुणो नोपासन
मविहितार्थस्यात् मनो ब्रह्मेत्युपासीतेति व
त् अन्यथा अशब्दमस्पर्शमित्यादि निर्गु
णवाक्यविरोधः अतो मनोमयत्वादयो न
पारमार्थिका इति चेन्मैवम् सर्वत्र प्रसिद्धोप
देशात् अ. १ पा. २ सू. १ इति सूत्रविरोधा
त् - सूत्रार्थस्तु - मनोमयत्वादिधर्मयुक्तः पर
मात्मा हि उपास्यः श्रुतिषु प्रसिद्ध एव पर
ब्रह्मण उपदेशात् - वेदान्तेषु सर्वेषु प्रसि
द्धं ब्रह्म सर्वं खल्विदं ब्रह्म तज्जलानिति शा
न्त उपासीत अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ... एकमेव तत्र तदेव म
न उपासीत ...

नो

99

नोमयत्वादिधर्म्मैर्विशिष्टमुपदिश्यते नहि स
र्वैर्भुवेदान्तेषुकल्पितगुणोपदेशा हीनिवक्तुंश
क्यन्ते साध्यासिद्धिप्रसंगात् नचसर्वंखल्वि
दंब्रह्मेतिवचनमेवाभावज्ञापनार्थंमिथ्या
त्वविधिः नहिक्रतुः सक्रतुंकुर्वीतेतिसगु
णोपासनविधिरनर्थकः स्यात् नहिनिर्वि
शेषज्ञानवतः सगुणोपासनविधिरितिसङ्ग
च्छन्ते अतः अशब्दमस्पर्शमित्यादिश्रुति
स्तु भूतभौतिकवैलक्षण्यंब्रह्मणः प्रतिपा
दयतीति नविरोधः - सत्वादयोनसन्ती
शेयत्रचप्राकृतागुणाः इतिस्मृतेः नतत्रेत
षांरसंनियमगन्धवत्त्वयदिति गन्धरसादे
र्निषेधः इहतु सर्वगन्धः सर्वरस इति यावद
न्धरसविधिः नचैकस्मिन्वस्तुनिगुणानद
भावाद्युपपन्नाविति तस्माद्विषयभेदवर्ण
नेनहि विरोधपरिहृतिः साचकार्यब्रह्म
णिमनोमयत्वादिः शुद्धेत्वशब्दत्वादि।
रितिचेन्न विश्वमेवेदंपुरुषस्तद्विश्वमुप
जीवति - पतिंविश्वस्यात्मेश्वरं शाश्वतंशि
वमच्युतं - यमन्तः समुद्रेकवयोवदन्ति न
तस्येशेकश्चन - यस्यनाममहद्यशः - परा
त्परंयन्महतोमहान्तं नतत्समश्चाभ्यधि
कश्चदृश्यते - श्वेताश्वतरोपनिषदि सविश्व
कृद्विश्वविदात्मयोनिः ज्ञः कालकालोगु

णीसर्वविद्यः प्रधानक्षेत्रज्ञपतिर्गुणेशः संसार
मोक्षस्थितिबन्धहेतुः - एको देवः सर्वभूतेषु
गूढः - सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ
स्मृतः नहि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि-
वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः -
एष आत्माऽपहतपाप्मा - परास्य शक्तिर्वि
विधैव श्रूयते इत्यादिश्रुतिस्मृतिभिर्निरस्य
णाखवपरतेत्वतया प्रतिपाद्यते दिव्यकल्याण
गुणयोगेन सगुणत्वं प्राकृतहेयगुणराहि
त्येन निर्गुणत्वञ्चेति विषयभेदवर्णनेनैकस्यै
वावगमात् ब्रह्मद्वैविध्यमिति दुर्वचनम्

भेदे शारीरकसूत्राणि -

नेतरोऽनुपपत्तेः (अ. १ पा. १ सू. १६
भेदव्यपदेशाच्च - - - सू. १७ (अर्थः
रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति श्रुतिः
(अयं जीवः तं परमानन्दस्वरूपं लब्ध्वा प्राप्यानन्दि
तो भवतीति कर्तृकर्मभेदः श्रुतौ -

(अस्मिन्नस्य च तद्योगं शास्ति (अ. १ पा. १ सू. १९
(अस्य जीवस्य (अस्मिन्) परे योगः मुक्तिः इ
ति श्रुतिः शास्ति कथयति - (आधाराधेयभावं संयोगञ्च

(अन्तस्तद्धर्मोपदेशात् - - सू. २० (अर्थ
यएषोऽन्तरादित्ये - यएषोऽन्तरक्षिणि - एतयोः श्रु
त्योरेष इति पदेन न जीव उक्तः किन्त्वीश्वरः (अप
हतपाप्मत्वादिधर्मोपदेशात् न हि ते जीवे -

95

101
१८२

भेदव्यपदेशाच्चान्यः अ. १ पा. १ सू. २१ अर्थः
यः आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद
ति श्रुतेरादित्यादि शरीराभिमानि जीवादन्तर्या
मीश्वरोऽन्य इति सूत्रार्थः

सर्वत्र प्रसिद्धोपदेशात् अ. १ पा. २ सू. १
विवक्षितगुणोपपत्तेश्च ...... सू. २
अनुपपत्तेस्तु न शारीरः — — सू. ३
कर्तृकर्मव्यपदेशाच्च — — सू. ४

एतमितः प्रेत्याभिसम्भवितास्मि - जीव उपास
को वदति - अहं अस्माल्लोकात्प्रेत्य मृत्वा एतं
उपास्यं परमात्मानं प्राप्स्यामि इति श्रुत्यर्थः अतो
जीवेश्वरयोर्भेदः स्पष्टः -

शब्दविशेषात् — — — सू. ५

यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकत
ण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मयः
इति श्रुतौ अन्तरात्मन्निति सप्तम्यन्तपदं जीवात्मा
नं वदति पुरुष इति प्रथमान्तं परमात्मानं कथय
ति अतो जीवात्परमात्मा भिन्नः यथा - व्रीह्यादी
नां तण्डुला व्रीह्यादेस्तुषेभ्य अन्तरा तथा जीवाद
न्तः परमात्मा प्रकाशरूपः -

स्मृतेश्च अ. पा. सू. ६

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्स
र्वभूतानि यन्त्रारूढानि मायया इति गीतायामपि ई
श्वराज्जीवस्य भेदः सिद्ध्यति -

सः अधिभूतः - यः सर्वेषु जीवात्मसु सन्नधश्या
त्म - एतान्सर्वांश्चात्मनो जीवान् तेषामन्तः सन्नेरय
ति सः अन्तर्यामीईश्वरः इति श्रुति सारार्थः

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते सू. २०

पूर्वसूत्रान्न कारोऽत्रानुवर्त्यते - शारीरश्चा जीवः
द्रष्टृत्वादिधर्मवानपि नान्तर्यामी काण्वा माध्यं
दिनाश्च अन्तर्यामिणौ जीवात्मनोर्भेदं कथय
न्ति - अ. १ पा. ३ मुक्तोपसृप्यव्यपदेशात् सू. २

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ
मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति विष
यवाक्यम् - समश्नुते प्राप्नोति -

भेदव्यपदेशात् अ. १ पा. ३ सू. ५

तमेवैकं जानथ आत्मानं इत्यत्र ज्ञातृज्ञेययो
जीवब्रह्मणोर्भेदकथनात् -

स्थित्यदनाभ्यां च अ. १ पा ३ सू. ७

द्वा सुपर्णा सयुजा इति मंत्रे औदासीन्येन स्थितेः क
र्मफलभोगकथनाच्चोभयोर्भेदः -

ईक्षतिकर्मव्यपदेशात्सः अ. १ पा. ३ सू. १३

स एतस्माज्जीवघनात्परात्परं पुरुषमभिशयं ईक्ष
ते इति श्रुतौ ईक्षतिकर्मदर्शनात् उपासकः पुरु
षः हिरण्यगर्भात्परं ब्रह्म मीश्वरमीक्षते - अ
त्रापि जीवपरयोर्भेद एवोक्तः -

परात्तु तच्छ्रुतेः अ. २ पा. ३ सू. ४१

ईश्वरानुग्रहात्प्रवर्त्यते जीवः -
व्यासः स्मरति - तत्र यः परमात्मा हि स नित्यो निर्गु

अन्याच श्रुतिः तेयदन्तरा तद्ब्रह्म इति

105

१०५

णः स्मृतः न लिप्यते कर्मणैवापि पद्मपत्रमिवाम्भ
सा— अस्याऽयमर्थः तत्र जीवात्मपरमात्मनोर्मध्ये
यः परमात्मा स नित्यः निर्गुणः पद्मपत्रवन्निर्लेपः

अविभागेन दृष्टत्वात् अ.४ पा.४ सू.४

नत्वविमुक्तो परब्रह्मणि अविभागेन तिष्ठति तत्वम
सि अहं ब्रह्मास्मीत्यादवविभागदर्शनात्—

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ‥ सू.५

अपहतपाप्मत्वसत्यकामत्वसत्यसंकल्पत्वस
र्वज्ञत्वादब्राह्मधर्मैर्ब्रह्मत्वं प्राप्नोति अविभागे
नेति जैमिनिः—

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः सू.६

चैतन्यस्वरूपेणापाप्मत्वादिनिवृत्त्या ब्रह्मस्वरूपे
णपरब्रह्म प्राप्नोति इत्यौडुलोमिमतम्—

भाव भा X एवमप्युपन्यासात्पूर्वभावादविरोधं बाद
रायणः ७

चैतन्यस्वरूपत्वांगीकारेऽपि पूर्वभावात् ब्राह्मण
यीत् सर्वज्ञत्वादेरविरोधः—

भावं जैमिनिर्विकल्पामननात् सू.११

शरीर मुक्तस्य मन इन्द्रियाणि सन्ति स एकधा भवति
त्रिधा भवति पञ्चधा सप्तधा नवधा इत्यादिश्रुते
रिति जैमिनिः— शरीरभेदं विनानेकप्रकारत्वं न संभवति—

अभावं बादरिराह ह्येवम् १०

मुक्तस्य इन्द्रियाणि न सन्ति मनोऽस्ति तेनैव
सर्वकामान्युपपत्तिं मन्यते च—

द्वादशाहवदुभयविधं बादरायणोऽतः १२
द्वादशाहस्तत्रवदुभयविधश्रुतिदर्शनात् उभय

106
१०६

विधं भवति यदा सशरीरतायाः संकल्पं करो ति तदा सशरीरो भवति - अशरीरतायाः संक ल्पे कृतेऽशरीरो भवति -

प्रदीपवदावेशस्तथाहि दर्शयति १५

प्रदीपवत् मुक्तस्य सर्वेषाम्कामभवत्येश्वर्ययोगात् -

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च १७

जगदुत्पत्तिस्थितिप्रलयव्यापारान् वर्जयित्वान्यदैश्वर्यं मुक्तस्य भवति जगद्व्यापारस्तु नित्यसिद्धेश्वराधीनः उत्पत्त्यादिनित्यसिद्धेश्वरप्रकरणे सति ईश्वरो न्यस्त इत्येतो ऽसन्निहितः ईश्वरज्ञानादेव न तेषामीश्वरत्वं चेतव्यम्

इत्यादीनि ब्रह्मसूत्राणि स्फुरणयाजीवपर भेदप्रतिपादकानीति ज्ञेयम्

ननु आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति श्रुतौ अभेद उक्त इति चेन्न अयमस्मीत्यस्य शाकुतिकशरीरादिभ्यो भिन्नोऽस्मीत्यर्थात् नत्र कोमेति श्रुतौ जीवात्मनामेवेति तदुपायमुक्तम् एवं ज्ञात्वा श्वेतकेतु ऋत्विग्भिः ब्रह्मा हमित्यस्य ब्रह्मकोहमित्यर्थः यथा तदीनदो लोके सागरेऽहमिति ताभियात् तद्वदात्मा देहादेरनेकता भिन्नामि त्यादिति कौऽर्थोऽस्त्वेवं अतो जीवोऽभेदो पासनया ईश्वरो कथं प्राप्नोतीत्यर्थः एवं यदस्यात्मा यादिविशेषाविरुद्धवचः अहमेव परं ब्रह्मेति वरवाक्ये

एवं मोक्षपरत्वात्ममानसाऽभेदोपासनाया वाच्यं गावि ४

(ए) समाप्तमस्मिन् प्रपञ्चमिथ्यात्ववादमतम् (ए) ४

107

व चक्षस्तेयम् - अन्यात्मव्यतिरेकेणाद्वितीयं योन
पश्यति ब्रह्मभूतः सर्वे इदन्तयदन्ऽदा हृत इति
दत्तस्त तिवचोर्थस्तु द्वितीयं जीवं स्वात्मसमं पश्य
ति चेत्तनत्वं तत्र तत्सुखदुःखादिकं स्वात्मोपम्येन पश्य
तीति बोध्यः - सर्वभूतान्तरस्थायमित्यत्र चिदा
त्मने प्रत्यक्त्वेनाव्यक्तरूपाय महतेऽपि वनमो नम
इति कालिदासवाक्ये मसभितस्यास्मदात्मनेऽन्तर्या
मितोऽनमो नम इत्यर्थः -
एवं श्रुतिस्मृतिसूत्रपुराणेतिहासेषु परात्मनोः पारमा
र्थिको भेद एव निरूपितः -
अथ मद्वैतवादः प्रथमं ~~[illegible]~~ बऽभिज्ञो दशबलोऽ
द्वयवादी विनायक इत्यनुशासनादिसिद्धानां क्षणि
कविज्ञानात्मवादिवौद्धप्रभेदानामासीत् - नास्ति
प्रकृत्यादिवाह्यंवस्त्वन्यत् येन तत्संयोगादौपाधि
वा कस्तात्त्विकौ वन्धः स्यात् किन्तु क्षणिकविज्ञानसं
तानमात्रमद्वितीयं तत्त्वमन्यत्सर्वं सांवृतिकम् स
म्वृतिश्चाविद्या तत एव वन्धः तथा चोक्तं तैः अ
भिन्नोपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः ग्राह्य
भेः ग्राहकसम्वित्तिभेदवानिव लक्ष्यत इति - तन्निरा
सायाथातो ब्रह्मजिज्ञासेत्यादिचतुर्लक्षण्या श्रीभग
वान्वेदव्यासः कृष्णः पाराशर्यः जैमिनिवदं तां हि मी
मांसामास निवबन्ध च ब्रह्ममीमांसासमाख्यया -
भगवांश्चोधायनस्तु ब्रह्ममीमांसायाश्चोपनिब
दाश्च भगवतीतोपनिबदाश्च परमगहनैर्दुरव
र्थमाविश्चक्रे कीर्तेन वृत्तिपदव्यपदेशभाञ्जि भा
ष्याणि प्रणिनाय - तदेतदाऽऽकल्पौद्भूतानवर रंभो

108
१०८

न प्रततताऽनवच्छिन्नमार्गसम्प्रदायपारम्परीकरिक्का
न्नौपनिषदहार्दसर्वस्वभूतं द्वितीकारमतं भगवद्भि
श्शङ्करप्रभृतिऽगुरुदेवादिमुनिभिः प्राम्भिराचार्य्यैरार
क्षितं - तस्य महर्षेर्मतं तत्र तत्र शाङ्करभाष्ये पूर्व
पक्षत्वेनोपन्यस्तम् रामानुजाचार्यैः श्रीभाष्य
कृद्भिः प्रत्युज्जीवितं राद्धान्तविधया बोधायन
मतं पुनः प्रतिष्ठापितमद्यापि विद्योतमानमव
गाहते प्रतीयतां निर्विशेषाद्वैतवादस्य नो खलु
परोक्षमिव विपरीतकारणम् - शाङ्कराचार्य्योक्ततन्त्रा
तिकूल्यादविभ्यतो विभ्रान्तस्य चरमतात्पर्यमपि वित
ण्डकथायां निर्विशेषवस्तुपरतयैवालीलपन् - भग
वद्गीताभाष्ये १३ क्षेत्रसंचाधिमान्त्रिक्रोत्यस्य भाष्ये शङ्क
रोक्ता वितण्डा - यथा ऽप्रयसाऽविद्याकस्येति - यस्य
दृश्यते तस्यैव - कस्य दृश्यत इत्युच्यते ऽप्रविद्याक
स्य दृश्यत इति प्रश्नो निरर्थकः - कथं - दृश्यते चेदवि
द्या तद्वन्तमपि पश्यसि न च तद्वत्युपलभ्यमाने साक
स्येति प्रश्नो युक्तः इत्यादि -
ऽनन्तरं वाद्वैतवादिनोऽपि भास्कराचार्य्या वेदान्ताचार्यो
न तज्ज्योतिषिकाः नवबुभुक्षवन्तः स्वीयमीमांसाभाष्ये -
स्वाभिप्रायसम्बन्ध्यास्याभिप्रायप्रकाशनाय व्याख्या
नं चेदिदं शास्त्रव्याख्येयं निर्वृत्तये २ इत्यादि -
अथाप्यस्याद्वैतवादस्य भक्तिवाक्यविहीनविशेषे यत २६
या नातीवेनावनाधिराजताद्वैतवादः - अथैव हि वादः स
मावनातिक्रान्तनिर्विशेषाद्वयतत्त्वं प्रतिपादयन् जना
नां मनस्सु सहसा सबलं चिह्नं लोपयन् निर्वचनीयवादेन
वदन्तर्हस्यावलम्बः प्रतितिष्ठति न चाधिवितण्डं नि
र्दवनोऽस्यानिर्वचनीयतावादस्यागमप्रधानक

नास्तिकाः खलु वैनाशिका भवन्ति नास्तिकाः ॥

घासुसुस्फुटमाभ्यत्नाभोऽभूवति सम्भवी। तथा नाघवि
घोऽस्मावचप्रपञ्चादेः सर्वथाऽनिर्वाच्यतामन्तरेण के
वलाद्वैतस्वाराज्यसमासादनं संघटत इति- केवला
द्वैतवादवदावदो वितण्डाकथाशरणतया साक्षादेव पु
रस्कुर्वाणो निखिलसंव्यवहारमूलप्रमाणप्रमाणप्र
तिपक्षार्थोऽन्धस्योपयोगिनस्तिलशः कदलीकाण्ड
खण्डनखण्डखण्डयन्सर्वथाऽनिर्वचनीयतां जगतः
प्रतिपादयाम्बभूव श्रीश्रीहर्षः कवितार्किकशिरो
मणिः- अयं खल्वनिर्वचनीयतावादो मिथ्या
वादिनां बौद्धानां सिद्धान्तसर्वस्वभूतस्तदीयग्रन्थेषु
प्रायशः प्रसज्यते स्म - अनन्तरं विद्वद्धर्मेन्द्रश्री
शबरस्वामिकुमारिलभट्टप्रभृतिभिर्मीमांसकैः
युक्तिकलापैर्विज्ञानवादिमतेऽनन्तरालितते संजा
तायां च तदीयविरलतायां तदीयेष्वेव पुस्तकेषु य
त्र कुत्रचिदुपालभ्यत - अथ समनन्तरकाले
यं खलूपयोगिनं विज्ञाय तदीयपुस्तकेभ्यः आ
यः सङ्कलयाञ्चकार - भारतेऽत्र बौद्धमतोच्छेदाणा
सीनरामप्रयत्नतयाऽनन्ये वैनाशिकाः प्रदर्शोऽव ति
पिस्फूयते बौद्धोऽवतीर्य विज्ञानवादेन जगन्निजन
मनस्सु मोहकत्तैलोकलयिष्यतीति-
तदेवं सति भेदोऽयं बौद्धानां ब्रह्मवादिनाम् यदाद्यं रे
केऽनिर्वाच्यं कृत्स्नं-ब्रह्मेतरत्परे ॥
तदभावताधिगत्यविशेषं बुद्धः- उभावपि विच्य मा
नानां स्वभावाना मा वधार्यन्ते अतो निरभिलाप्याः सन्ति
स्वभावास्मदेशिताः ॥ अस्यार्थः यथा दृश्यमान तिरि घा

110

१६०

ऽप्रकार्थक्रियाकापानां दर्शयेत्यौकाग्रहितम् कर्मस्वरूपत्याज्यत्वमत्रचप्रति
पाद्यते - सर्वकर्मपरित्यागान्नैष्कर्म्यं तत्रचोच्यते परमात्मजीवयोरैक्यं यथात्र
प्रतिपाद्यते - ब्रह्मणोस्य परं रूपं निर्गुणं कथितं मया - सर्वस्य जगतोप्यस्य ना
शः पदार्थभङ्गो विविच्यमानो विचारं न सहते तथाप्यर्थ
क्रियापि विविच्यमाना विचारासहत्वात् (निरभिलप्या) कलौय नद ५
अनिर्वचनीयाः (निःस्वभावाः) प्रतीत्यर्थः - (देशि १२
ताः) उपदिष्टाः सन्तः -
ब्रह्मवादिनस्तु विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सद
सद्भ्यां विलक्षणं सद्भिरन्ते इति सौगतब्रह्मवादिनोर्भेदः -
आधुनिकानां वेदान्तिब्रुवाणामाधुनिकस्य मायावा
दस्याचलिङ्गं प्रदृश्यते तत्तेषामपि विज्ञानवादैक
देशितयाप्युज्यतएव - मायावादमसच्छास्त्रं प्रच्छ
न्नं बौद्धमेव च - मयैव कथितं देवि कलौ ब्राह्मणरू
पिणेत्यादि पद्मपुराणस्य शिववाक्यपरम्परास्यः -
नन्वतद्वेदान्तिमतम् - वेदार्थवन्महाशास्त्रं मायावा मयैवकथि
दमवैदिकं मिलितवाक्यशेषात् - अनिर्वचनीय तंदेविजगतो
मायावादनिषेधकं कापिलं सूत्रम् अनियतत्वेपि नाशकारण
नायौक्तिकस्यासंग्रहोऽन्यथाबालोन्मत्तादिसमत्व दि ५
म् अ. १ सू. २६ मायावादिबौद्धनिराकरणेऽपि
सूत्रमिदम् अर्थः पदार्थनियमो नास्ति भावाभाव
विरोधेन युक्तिविरुद्धस्य सदसदात्मकपदार्थस्य
न संग्रहः - श्रुत्यादिकं चास्मिन्नर्थे स्फुटं नास्ति यु
क्तिविरोधेन च सन्दिग्धश्रुतेरर्थान्तरसिद्धिः -

नासद्रूपा न सद्रूपा माया नैवोभयात्मिका स
दसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनीत्यादि सौर
दिवाक्यानामयमर्थः विकारजननीं मायामष्टरू
पामजां ध्रुवामित्यादि श्रुतिसिद्धा मायाख्या प्रकृतिः
परमार्थसती न भवति पूर्वपूर्वविकाररूपैः प्रतिक्षण
मपायात् नापि परमार्थाऽसती भवत्यर्थक्रियाकारि

111

११२

त्वेन शशशृङ्गविलक्षणत्वात्- नापि तदुभयात्मिका विरोधा
त्, अतः सदसद्भ्यामनिर्वाच्या सत्येवेत्यसत्येवेति च निर्व्य
पदेष्टुमशक्या- किन्तु मिथ्याभूता तयारब्धव्यावहारिकास
त्त्ववती- परिणामिनित्यतारूपा व्यावहारिकसत्त्ववती चेति
व्यावहारिकत्वं तु परिणामित्वमेवास्माकमिष्टं शुक्तिरज
तादितुल्यत्वमेव प्रपञ्चस्य प्रतिषिध्यते विज्ञानवादिनो
त्ति ज्ञानानामिवाधुनिकानां वेदान्तिब्रुवाणां मतम्-
यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै- परिणामा
दिसम्भूतां तद्वस्तु नृप तच्च किम् १ वस्तु राजेति य
ल्लोके यत्तु राजभटादिकम् तथान्यच्च नृपेत्थं तु न
सत्संकल्पनामयम् २ इति विष्णुपुराणादिभ्यः
परिणामित्वस्यैवासत्त्वावगमात्- सङ्कल्पनामय
मीश्वरादिसङ्कल्परचितम्- विज्ञानमयमेवैतदशेष
मवगच्छत- इत्यादिना विष्णुपुराणे मायामोहरूपिणा
विष्णुनाऽसुरेभ्योऽपि तत्त्वमेवोपदिष्टम्- तेनैव नाधिका
राददोषो विपरीतार्थग्रहणेन विज्ञानवादिनो नास्ति
कानभूवुरित्यवगन्तव्यम् विज्ञानमात्रसत्यताप्रति
पादकश्रुतिस्मृतयस्तु चिद्वीदं सर्वं तस्माद्विज्ञानमेवा
स्ति न प्रपञ्चो न संसृतिरित्यादयः कूटस्थत्वरूपां पा
रमार्थिकसत्तामेव वाद्यानां प्रतिषेधन्ति- तदेतत्स
र्वं ब्रह्ममीमांसाभाष्ये विज्ञानभिक्षुकृते मायावाद
निरसनप्रसंगतो विस्तारितं तेनेति-
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न
वै मुक्त इत्येषा परमार्थता १ सर्वशून्यं निरालम्बं स्व
रूपं यत्र चिन्त्यते अभावयोगः स प्रोक्तो येना
त्मानं प्रपश्यति इति श्रुतिस्मृतीनु प्ररूपाणां नि
रोधाद्यभावस्यैव तत्त्वतश्चोक्तं वतीश्रुतिः पूर्वोत्तरवाक्य
योः प्रपञ्चस्यैव प्रकरणात्- विलीनविश्वविदाका
शात्मैव तत्त्वतः प्रतिपादयामास स्मृतिश्च-
त्रैलोक्यं गगनाकारं तमसस्त्यंवपुः स्वकम् वियच्च

112
११२

वणात् तच्च वैराग्यं सदद्वैतैकत्वोपपद्यते सूत्र-
कारस्यत्वम् अतएव धर्मादेरपि श्रुतिरपि सदद्वैतमेव प्र
तिपादितवती - न केवलं श्रुत्यैव अद्वैतवादिनो
हि या अपि तु जगदसत्यताग्राहकप्रमाणाभावेना
पि - तथाहि निद्रादिदोषदुष्टान्तःकरणादिजन्य
त्वेन स्वाप्नविषयशङ्खपीतिमादीनामसत्यत्वं दृ
ष्टं लोके तच्च महदादिप्रपञ्चे नास्ति तत्कारणस्य प्र
कृतेर्हिरण्यगर्भस्य चादुष्टत्वात् यथापूर्वमक
ल्पयदित्यादिश्रवणात् ननु नेह नानास्ति कि
ञ्चनेत्यादिश्रुत्या बाधितत्वेनाविद्यादिनामाकश्च
नानादिदोषः कल्पनीय इति चेन्न नेह नानेत्या
दिश्रुतीनां प्रकरणानुरोधेन विभागादिप्रतिषेध
कत्वेन प्रपञ्चात्यन्तोच्छेदपरत्वाभावात् स्वस्या
पि बाधापत्त्या स्वार्थासाधकत्वप्रसङ्गात् - नहि
स्वत्रकालिकशब्दस्य बाधे तज्ज्ञापितोऽर्थः प्रतिप
द्यते - तस्मादात्मा विद्यानया श्रुतयो नात्य
न्तप्रपञ्चबाधपराः तत्र नेह नेति श्रुतेर्ब्रह्मणि भि
न्नं किमपि नास्तीत्यर्थः सर्वं समाप्नोषि ततोऽसि
सर्व इत्यादिस्मृत्येकवाक्यत्वात् वाचारम्भण
मित्यादिश्रुतेस्तु नित्यतारूपपारमार्थिकसत्ता
विरहोऽर्थः अन्यथा मृत्तिकादृष्टान्तासिद्धेः न
हि लोके मृत्तिकाविकाराणामत्यन्ततुच्छत्वं
सिद्धं येन दृष्टान्तता स्यात् - न निरोधो न चोत्प
त्तिरित्यादिश्रुतेस्त्वात्मातिरिक्तस्य कूट
स्थनित्यतारूपपारमार्थिकसत्ताविरहोऽर्थः कि
न्त्वात्मनो निरोधाद्यभावोऽर्थः अन्यथैतद्दर्शनान

19

114

धायाद्रव्यत्वेशब्दमात्रभेदः गुणत्वेच तदाधारतया
प्रकृतिसिद्धिः प्रकृत्यस्य निर्गुणत्वात् ॥ अथद्रव्यगु
णकर्मविलक्षणैवाविद्यावक्तव्येतिचेन्न तादृशप
दार्थाप्रतीतेः - प्रकृतेर्व्यापकत्वंतु देशिकाभावप्रति
योगितानवच्छेदकत्वमेव - यथाज्ञानस्यास्थिरच
राचरविलक्षणशरीरव्यापकत्वं ज्ञानत्वसामान्येनोच्य
ते प्राणव्यक्तीनांसर्वदेहसम्बन्धात् नतत्प्रकृतेः -
ननुवाचारम्भणमित्यादिश्रुतिभिः प्रपञ्चस्यबाधः
बाधाच्चाविद्यात्वदोषोपिस्वकारणेस्तीतिचेन्न प्र
दृष्टान्तक्रियान्यथानुपपत्त्या स्वकारणापेक्षका
र्यस्यैव रूपासत्त्वपरत्वात् ॥ तादृग्वाक्यानामन्यथा
स्रष्टृत्वादिवाक्यविरोधाच्च श्रुत्याप्रपञ्चबाधे प्रा
माण्याभावात् श्रुतेः प्रपञ्चान्तर्गतत्वात् वैधर्म्याच्च
स्वप्नादिवत् - उपलब्धौ प्रतिबन्धस्याभावात्स्वप्नस्व
प्रकाशमानमनाधाः प्रतिनिर्बन्धेन प्रपञ्चस्यानन्या
यः नेतिनेतीत्येवंविधवाक्यानितु विवेकपराण्ये
व नतु स्वरूपतः प्रपञ्चनिषेधपराणि - प्रकृ
तेनैकत्वंप्रतिषेधनीतिवेदान्तसूत्रात्

अथप्रमाणादिविभागः

प्रमाताचेतनः शुद्धः प्रमाणं वृत्तिरेव नः - प्रमार्थी
कारवृत्तीनांचेतने प्रतिबिम्बनम् १ प्रतिबिम्बित
वृत्तीनांविषयोमेय उच्यते - साक्षाद्दर्शनरूपंच
साक्षित्वंवक्ष्यति स्वयम् २ अतः स्यात्कारणा
भावाद्धेतोः साक्ष्येवचेतनः - बिम्बादेः सर्वसा
क्षित्वमिति -
प्रतिबिम्बस्य बुद्धेरेव परिणामविशेषो बिम्बाका
रोजलादिगत इति मन्तव्यम् इतिचैतन्ययोरन्यो

न्यविषयतारूपसम्बन्धरूपतयान्योन्यस्मिन्नन्योन्यप्र
तिबिम्बसिद्धिः - एतेन वेदान्तिब्रुवा यद्वदन्ति बुद्धि
वृत्तावेव चैतन्यप्रतिबिम्बे तद्वृत्तौ चैतन्यविषयता
न तु चैतन्ये वृत्तिबिम्बोऽस्तीति तन्निरस्तम् उपदर्शि
तशास्त्रविरोधेन केवलतर्कस्याप्रयोजकत्वात् -
यद्यपि स्वप्नावपि अन्तःकरणप्रतिबिम्बितचैतन्यानां
जीवपदवाच्यानां सन्निधानादेवाधिष्ठानत्वे न तु
केनापि व्यापारेण कूटस्थस्य चिन्मात्ररूपत्वात् -
मुख्यमधिष्ठानत्वं त्वन्तःकरणस्य संकल्पादिवि
वर्तं - अन्तःकरणं चेतनोपचलितं भवति अतस्तस्य
चेतनायमानतयाऽधिष्ठानत्वमुपपद्यते - ननु न
चितेः संगित्वं नित्योपचलचैतन्यसंयोगविशेषमा
त्रस्य संयोगविशेषजन्यचैतन्यप्रतिबिम्बस्यैवान्तःक
रणोपचलनरूपत्वात् न तु चैतन्यमन्तःकरणे सङ्क्रा
मति येन संगिता स्यात् अग्नेरपि हि प्रकाशादिकं
न लोहे सङ्क्रामति किन्त्वग्नियोगविशेषस्यैव लो
हस्योपचलनम् - नाप्यनेन परिणामित्वं सामा
न्यगुणातिरिक्तधर्मोत्पत्तावेव परिणामव्यवहा
रात् अयं च संयोगविशेषोऽन्तःकरणस्यैव सत्त्वोद्रे
करूपात्परिणामाद्भवतीति फलबलात्कल्प्यते प्र
त्यक्षस्यापरिणामित्वेन संयोगे तन्निमित्तकविशे
षाभावात् अयमेव च संयोगविशेषो बुद्ध्यात्मनोर
न्योन्यप्रतिबिम्बने हेतुः - बुद्धौ चैतन्यप्रतिबिम्बश्चै
तन्यदर्शनार्थं दर्पणे मुखप्रतिबिम्बवत्कल्प्यते - अ
न्यथा कर्मकर्तृविरोधः स्यात् साक्षात्स्वदर्शनानुपप
त्तेः अयमेव चिच्छाया चैतन्याध्यासः चिदावेश इ
ति चोच्यते - यश्च चैतन्ये बुद्धिप्रतिबिम्बः स चाल्पद्वि
षयैः सह बुद्धेर्भानार्थमिष्यते अन्यथाकारतयैवार्थग्र

119

ननु: प्रकृतेरेव स्रष्टृत्वं कथमुच्यते एतस्माद्वा आत्मन आ
काशः सम्भूत इति श्रुत्या पुरुषस्यापि स्रष्टृत्वमुच्यत इ
ति चेन्न प्रकृतौ स्रष्टृत्वे वस्तुत्वे च सिद्धे पुरुषस्य स्रष्टृ
त्वाध्यासपरत्वश्रुतिरुपसिद्ध्यति अस्याः श्रुतेरुपास
नायामेव तात्पर्यात् अजामेकामिति श्रुत्या प्रकृतेः
स्रष्टृत्वसिद्धेः पुंसः कौटस्थ्यबोधकश्रुत्यन्तरविरो
धाच्च उपचाररूपोऽध्यासो लोके सिद्ध एवास्ति स्वशक्तियु
योधेषु वर्तमानौ जयाजयौ यथा राजन्युपचर्येते तथा
स्वशक्तौ प्रकृतौ स्रष्टृत्वादिकं वर्तमानं शक्तिमत्सु पुरुषेषू
पचर्यते शक्तिशक्तिमदभेदात् तदुक्तं कौर्मे - शक्ति
शक्तिमतोर्भेदं पश्यन्ति परमार्थतः अभेदं चानुपश्यन्ति यो
गिनस्तत्त्वचिन्तकाः १ भेदमन्योन्याभावमभेदं चाविभाग
लक्षणं प्रकृत्यादितत्त्वोपासकाः पश्यन्तीत्यर्थः तयोश्चोदाह
रणम् अथात आदेशो नेति नेतीत्यादिश्रुतिः आत्मैवेदं
सर्वमित्यादिश्रुतिश्चेति भावः - ननु प्रकृतावपि स्रष्टृत्वं वा
स्तवमिति कुतोऽवधृतं सृष्टेः स्वप्नादितुल्यतायाः श्रव
णादिति चेन्न कार्याणामर्थक्रियाकारितया वास्तवत्वेन
कार्यतत्त्वधर्मिग्राहकप्रमाणेन प्रकृतेर्वास्तवस्रष्टृत्व
सिद्धेः स्वप्नादितुल्यताप्रतिपादकश्रुतयस्त्वनित्यतारूप
तत्त्वांशमात्रे पुरुषाध्यस्तत्वांशे वा बोध्याः अन्यथा सृ
ष्टिप्रतिपादकश्रुतिविरोधापत्तेः स्वप्नपदार्थानामपि
मनःपरिणामत्वेनात्यन्तासत्ताविरोधाच्च - ×१ हत्त्व×
सृष्टिश्च महदादिक्रमेण पञ्चभूतानाम् यद्यप्येतस्मादा
त्मन आकाश इत्यादिश्रुतावादावेव भूतसृष्टिः श्रूयते
तथापि महदादिक्रमेणैव सृष्टिर्भूतानां सृष्टिरिष्टा - ते
जआदिसृष्टिश्रुतौ गगनवायुसृष्ट्योरग्रहणवदत्रश्रु
तावपि महदादिसृष्टिः ग्रहणीया अत्र च प्रमाणं घट
सृष्टिवदन्तःकरणादिकाखिलसृष्टेरन्तःकरणवृत्तिपू
र्वकत्वानुमानम् महदादेरन्तःकरणत्वात् किञ्च
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च - खं वायुर्ज्यो

इति पूर्वं प्रपंचितमस्माभिः ननूपाधयोप्यविद्यकाननै
रद्वैतभंग इति चेन्न पूरुषो ऽविद्येति श्रुत्याभ्यामंगीकृता
भ्यामद्वैतप्रमाणस्य श्रुतेर्विरोधस्तदवस्थ एव अस्मा
भिरविकृतिपूरुषयोर्द्वयोरेवांगीकारः विकारस्य वा
चारम्भणमात्रतापीष्यते न च पूरुषनानात्वस्वीकार
स्वकृतेर्भिन्नत्वांगीकाराच्चास्येवास्मद्विरोध इति वा
च्यम् अद्वैतवादिनां उत्तरं सिद्धान्तमनपरते आत्म
साधकप्रमाणाभावात् तदङ्गीकारे च तेनैवाद्वैतहानि
रिति जितं नैरात्म्यवादिभिः चैतन्यरूपप्रकाशात्म
कैतन्यसिद्धौ कर्मकर्तृविरोधः प्रकाश्यप्रकाशसं
बंधे हि प्रकाशनमालोकादिषु दृष्टं स्वस्य त्वात्मसि
सम्बन्धश्चाविरुद्धः अस्मन्मते तु बुद्धिवृत्त्या स्वप्र
प्रमाणांगीकारात् तद्द्वारा प्रतिबिंबरूपस्य स्वस्य बि
म्बरूपे स्वस्मिन् सम्बन्धोऽपरते यथा सूर्ये जलपा
त्रप्रतिबिम्बरूपः स्वसम्बन्धः आत्मनः स्वप्रकाश
त्वश्रुतिस्त्वनन्याधीनप्रकाशादिपरा बोध्या-
न तु नास्तिकमते कर्तृविरोधः स्वनिष्ठप्रकाशधर्मप्र
रा स्वनिष्ठस्वसंबंधसम्भवात् यथा वैशेषिकाणां
स्वनिष्ठज्ञानद्वारा स्वस्य [illegible] स्व[illegible]यं विषय इति चे
न्न चेतने प्रकाशरूपधर्मः सूर्यादिष्विव न किन्तु चि
स्वरूप एव पदार्थो जडं प्रकाशयति यतो जडव्याव
दि त्तिमात्रेण प्रकाश इत्युच्यते न तु जडविलक्षणधर्मवत्त
येति अत एव निर्धर्मकतया नेति नेतीत्यवस्तुत्वो
पदिश्यते न तु विधिमुखतयेति - स्थितिरपि इ
दं तदिति निर्देष्टुं तत्स्वरूपाणि न शक्यते -
अद्वैतश्रुतिस्तु रागिणां पूरुषव्यतिरिक्ते वैराग्यार्थैव
-पूरुषज्ञानद्वैताभावज्ञाने स्वतंत्रफलानराश्र

…फलकत्वप्रतिपादनविरोधात् नहि मोक्षो
…ति प्रतिपाद्य मोक्षस्य फलत्वमप्रमतो विदधा
…प्राप्नोत्यक्षय्यलोकानामर्थात् पूर्वकृतादेवेत्यलम्
प्रपञ्चो न केवलं वर्तमानदशायामेव सम्भवि
तु सदैव सन् - असत उत्पादासम्भवात् सूक्ष्मरूपेण
सदैवोत्पद्यतेऽभिव्यक्तं भवति -
अभिमानवृत्तिकमन्तःकरणमहंकारः स एव कृ
तिमान् अभिमानोऽत एव प्रायशः प्रवृत्तिदर्शना
त् न पुरुषः कर्ताऽपरिणामित्वात् - अहङ्कार
कर्तृत्वेऽपि भोक्ता चिदेव न चान्यनिष्ठकर्मणा
न्यस्य भोगे पुरुषविशेषनियमो न स्यादिति वाच्य
म् - अहंकारेणार्जितं तस्याश्रितो यत्कर्म तज्जन्यता
क्लेशस्य - तथा च योऽहंकारो यं पुरुषमादायावेन
नेऽहं ममेति वृत्तिं करोति तस्याहंकारस्य कर्म तस्या
मनदुच्यते तेनैव च कर्मणा तत्राभिमानि भोगोऽप्येते
इति नास्ति प्रसङ्गः -
ये पूर्वसर्गे प्रकृत्युपासनया प्रकृतौ लीनास्ते सर्गका
येश्वरा भवन्ति विष्ण्वादयः - तदुक्तं मनुना ब्रह्मा
विश्वसृजो धर्मो महानव्यक्तमेव च उत्तमां सा
त्विकीमेतां गतिर्मनीषिणः अ. १२ श्लो. - वि
श्वसृजः मरीच्यादयः - धर्मराजः - महत्तत्त्वं म
अव्यक्तं प्रकृतिः -

सिंहावलोकनन्यायेन पुनरुच्यते

यद्यप्यात्मनामन्योन्यंभेदवाक्यवदभेदवाक्यान्यपि सन्ति
तथापि नाद्वैतं नात्यन्तमभेदः अजादिवाक्यस्थैः प्रकृ
तित्यागात्यागादिलिंगैर्भेदस्यैवासिद्धेः नत्वत्यन्ता
भेदे सति तानि लिङ्गान्युपपद्यन्ते अभेदवाक्यानि तु
साम्यादिश्रुत्यैकवाक्यतया, वैधर्म्यादिलक्षणाभे
दपरतयोपपद्यन्ते अपि मानादिनिरपेक्ष्यत्वाच्चाप
पत्त्यापि तन्परत्वावधारणाच्च आत्मैवेदं सर्वं ब्रह्मै
वेदं सर्वमित्यादिश्रुत्या, नात्मभिन्नाभोग्यप्रपञ्चेनाद्वै
तं प्रत्यक्षं बाधकम्, आत्मनः सर्वभोग्याभेदे घटप
टयोरप्यभेदः स्यात् तदभिन्नाभिन्नस्य तदभिन्नत्वे
नियमात्- स च भेदग्राहकप्रत्यक्षबाधितः- श्रुतीनां
तु अविवेकिपुरुषात्मप्रत्युपासनार्थकानुवादत्वं पर
त्वम् लोके हि शरीरशरीरिणोर्भोग्यभोक्त्रोश्चाविवे
केनाभेदो व्यवह्रियते, अहं गौरो ममात्मा भद्रसेन
इति- अतस्तमेव व्यवहारमनूद्य तान्प्रति तयो
पासनां श्रुतिर्विदधाति सत्त्वशुद्ध्याद्यर्थम् अत एव
परमार्थदशायामुपास्यानामात्मत्वं प्रतिषेधति श्रु
तिः- यन्मनसा न मनुते येनाहुर्मनो मतम् त
देव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इत्या
दिना- किञ्च एकात्मवादिनां जगदुपादानकारण
मपि न सम्भवति- केवलआत्मा- आत्माभिन्नावाऽ
विद्या- तदुपहितं वा न सम्भवति आत्मनोऽसङ्गत्वा
त्- सङ्गरूपो हि यः संयोगविशेषस्तेनैव द्रव्याणां वि
कारो भवति- अतोऽसंगत्वात् केवलस्यात्मनोऽवि
नीयस्योपादानत्वं नाविद्याद्वारापि सम्भवति
असङ्गत्वेनाविद्यायोगस्य प्रागेव निरस्तत्वात्-
प्रत्येकोपादानत्वं उभयोपादानत्वमप्यसङ्गत्वा
देवासम्भवि- यदि चाविद्याद्रव्यरूपापरिणामि

128

ता गगने वायुवदिष्यते तदन्याद्वैतहानिः तथा प्रकृ
तिरेव सेतिहि द्वस्साधनं च - तादृशं चाविभागेनाद्वैतम
स्याकमपीष्टमेव - सदेव सोम्येदमग्र आसीदेकमे
वाद्वितीयं ब्रह्मेत्यादिश्रुत्यापि चाविभागेनास्य रूपमे
वाद्वैतं प्रतिपाद्यते न तु तद्द्वितीयमस्ति ततोन्यद्विभ
क्तं यत्पश्येदिति श्रुत्यन्तरात् तथा चोक्तम् आसी
ज्ज्ञानमयो ह्यर्थ एकमेवाविकल्पितम् तयोरेक
तरो ह्यर्थः प्रकृतिः सो ह्यमयात्मिका । ज्ञानं त्वन्यतमो
भावः पुरुषः सोऽभिधीयते इति अविकल्पितम्
अविभक्तम् तस्माद्वेदान्तानामखण्डाद्वैते तात्पर्यं
तथा ह्याधुनिका वेदान्तिनोऽन्यत्पूर्वपक्षमात्रमेव
ब्रह्ममीमांसासिद्धान्तं यापश्यन्ति तत्र ब्रह्ममीमांसा त
त्सातन्त्र्येण प्रत्युत तद्विरोधेन निराकरणीयमेव
तास्माभिर्ब्रह्ममीमांसासिद्धान्तो दूष्यते अपि तु वेदा
न्तेष्वापाततः संभावितोऽर्थ एव निराक्रियते इति
स्पष्टम् -
आत्मा प्रकाशस्वरूपः नानन्दरूपः - एकस्योभयरू
पतानसम्भवति - दुःखज्ञानकाले सुखानुभवेन सु
खज्ञानयोर्भेदात् न चाज्ञानविशेषः सुखमिति शक्य
ते वक्तुम् आत्मस्वरूपज्ञानस्याखण्डत्वात् अत एव चै
तन्यानुभवकाले सुखस्यावरणमपि वक्तुं न शक्यते
अखण्डत्वेनानन्दावरणे दुःखज्ञानानामप्यनुभवानुप
पत्तेः न स्यात्मनोंऽशभेदोऽस्ति येनानन्दांशावरणेऽपि चैत
न्यांशो भायात् न च श्रुतिबलेनैतत्सत्तर्क इति वाच्यम्
आनन्दं तन्निरानन्दमित्यादिश्रुत्या चानन्दाभावस्या
पि प्रतिपादितत्वेन तर्कस्यैवात्र आदर्तव्यत्वात् नन्वेवं

ऽदुःखमसुखं ब्रह्मभूतम
व्ययभवात्मकमित्यादिश्रुत्या ×

129

नित्यविज्ञानमानन्दं ब्रह्मेत्यानन्दरूपताप्रतिपादक
श्रुतेः का गतिरिति चेद् दुःखनिवृत्त्यात्मनि श्रौतत्वादान
न्दशब्दो गौणः सुखं दुःखसुखात्यय इत्युक्तेः श्रुति
स्त्वौपाधिकानन्दपरा सत्यसङ्कल्पत्वादिश्रुतिवद्-
यत्तु निरुपाधिप्रियत्वेनात्मनः सुखरूपत्वात्तमा
नंदकल्पितत्वमद्रपीकारादिहाह तन्न दुःखाभाव
रूपतयापि प्रेमोपपत्तेः सुखत्वादिवदात्मत्वस्यापि
प्रेमप्रयोजकत्वाच्च अन्यथा परसुखेऽपि प्रेमापत्
तेः अतो गौणत्वयोगे बीजं तु अत्रात्रापि दुःख
निवृत्तिरूपात्मस्वरूपमुक्तिप्ररोचनम्- दुःखनि वृत्तिर्मुक्तिः =
अत एव का. सू. अ. ५ विमुक्तिप्रशंसाम
न्दानाम् ६८ अन्यच्च तत्रैव सूत्रम् ७२ पुरु
षप्रकृत्योरन्यत्सर्वमनित्यम्- ननु मायां तु प्रकृ
तिं विद्यान्मायिनं तु महेश्वरम् अस्यावयवभूतै
स्तु व्याप्तं सर्वमिदं जगत् इत्यादिश्रुतिभिः पुम्प्रकृ
त्योरपि सावयवत्वादनित्यत्वं स्यादिति चेन्न निष्क
लं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्यादि
श्रुतिभिर्निरवयवत्वस्य कथनात्- उक्तश्रुतिश्चा
काशजलयोरिवापि तापत्रचेतनयोरिव च विभाग
मात्रेणांशांशिभावं बोधयतीति
ननु कथं प्रकृतिभिन्नमनित्यं परमाणूनामनित्यत्वा
भावादिति चेन्न मनुवाक्यानुमेयकालश्रुत्याऽणू
नामपि कार्यत्वप्रतिपादनात् तथा च मनुः अ० १ श्लो०
अण्व्यो मात्रा विनाशिन्यो दशार्द्धानां च याः स्मृताः
ताभिः सार्द्धमिदं सर्वं सम्भवत्यनुपूर्वशः -
दशार्द्धानां पृथिव्यादि महाभूतानाम् न चात्रवा

६

क्येणुशब्देन घ्यणुकाद्येव ग्राह्यमिति शङ्क्यम् संकोचे
प्रमाणाभावात् अत्राणुशब्दोऽभूतचतुष्टयपरमाणुप
रएव वैशेषिकाद्यभिमतस्तस्य नित्यत्वेन नत्वणुप
रिमाणद्रव्यसामान्यस्य - रजोगुणस्य चाञ्चल्यान्निरोधे
नाणुत्वेपि नित्यत्वात् मध्यमपरिमाणत्वे नित्यत्वस्याव
श्यत्वे च क्रियायाऽत्रानुपपत्तेः - श्रुतिसिद्धकार्यत्वान्य
थानुपपत्त्या पृथिव्याद्यणूनां न निरवयवत्वम् अ
तएव तन्मात्राख्यसूक्ष्मद्रव्याण्येव पार्थिवाद्यवयवा अणूनः मत्र
इति पातञ्जलभाष्ये व्यासदेवैः प्रतिपादितम् पृथिवी
परमाणुर्जलपरमाणुरित्यादिव्यवहारस्तु पृथिव्या
दीनामपकर्षकाष्ठाभिप्रायेणैव - अतः प्रकृतिपर्य
न्तमणुत्वेपि न क्षतिः - यद्यपि तन्मात्रेष्वपि गंधाद्य
स्ति तथापि तस्यानभिव्यक्ततया न पृथिवीत्वादिनियाम
कत्वम् व्यंग्यगन्धादेरेव पृथिवीत्वादिसिद्धेः अतो न
तन्मात्राणि पृथिव्यादयः तेषु च सूक्ष्मभूतव्यवहा
रो भूतसाक्षात्कारणत्वादिमैवेत्यपि बोध्यम् -
सत्त्वादिगुणाणुपरिमाणाभूतेन्द्रियकारणभूताः
आकाशकारणं गुणविशेषस्तु विना - इत्यलं प्रसक्ता
नुप्रसक्त्यानुकृतमनुसरामः - पुरुषाः समाधिसुषु
प्तिमोक्षेषु ब्रह्मरूपाः बुद्धिवृत्तिविलयतो [illegible] देवोपाधि स्त
कपरिच्छेदविगमेन स्वस्वरूपदर्शनेन यावस्थानम्
यथा घटध्वंसे घटाकाशस्य पूर्णता - तथा चव्युत्थाने
वपुरुषाणां स्वभावो नैमित्तिकत्वाभावात् स्फटिक
स्यशौक्ल्यमिव - बुद्धिवृत्तिसम्बन्धकात्तेन परिच्छि
न्नचिद्रूपत्वेनाभिव्यक्त्या परिच्छेदाभिमानः तथा
वृत्तिप्रतिबिम्बवशात् दुःखादिमालिन्यमिव चभव

131

ति न सर्वमौपाधिकमेव उपाध्याख्यनिमित्तान्वयव्यति
रेकानुविधानात्स्फटिकलौहित्यवदिति अत्र शास्त्रे
ब्रह्मशब्दश्चौपाधिकपरिच्छेदमालिन्यादिरहितपरि
पूर्णचेतनसामान्यवाची नतु ऐश्वर्योपलक्षितपुरु
षमात्रवाची - अत्रैते श्लोकाः चिदाकाशोऽनभिव्यक्तो
नानाकारैरितस्ततः धीरत्नी सह व्यक्त्या चिद्रत्नी
प्रदर्शयेत् १ वस्तुतस्तु सदा पूर्णमेकरूपं च चिन्नभः
वृत्तिशून्यप्रदेशेषु दृश्याभावान्न पश्यति २ चक्षुषो
रूपवत्त्वेऽस्य दृश्यावृत्तिर्हि नेतरत् समाध्यादौ च सा
नास्तीत्यतः पूर्णः पूर्णः सदा ३ समाधिसुषुप्त्योः
बन्धबीजसहितं ब्रह्मत्वं मोक्षे निर्बीजं - समाध्यादौ
वंध ~~[illegible]~~ बीजस्य कर्मादेस्तदानीमुपाधावेवावस्थानं न
तु चेतने तु - प्रकृते च तथा भवति विचलनात् - जाग्र
दाद्यवस्थायां तु बुद्धिवृत्तिप्रतिबिम्बवशादेवोपाधि
कोबन्ध इत्यस्मकृदावेदितम् - असम्प्रज्ञातसमा
धौ क्रमेण बीजक्षयोऽपि भवति न निर्बीजमेव सर्वेषां त्व
अन्त्यया सर्वासामेवासम्प्रज्ञातव्यक्तीनां निर्बीज
त्वेऽपुष्यानानुपपत्तेः - सुषुप्त्यादौ यो ब्रह्मभावस्त
त्यागक्रियागतानात्रागादिदोषवशादेव भवति सचे
द्दोषो ज्ञानेन नाशितस्तर्हि सुषुप्त्यादिसद्वद्भवेवाव
स्थास्थिरा भवति सैव मोक्षः - ननु वासनाख्यबीजस
त्त्वेऽपि वैराग्यादिना वासनाकौण्ठ्याद्धीकारवृत्तेः स
माधौ माभवतु सुषुप्तौ तु वासनाप्राबल्याद्दर्शनं भवि
ष्यत्येवेति न सुषुप्तौ ब्रह्मरूपतापत्तेरिति चेन्न यथा वै
राग्ये तथापि दुर्दोषबलीयस्यपि सति वासनया न विषय
स्मारणं भवति निमित्तस्यासीमतस्संस्कारस्य व

132

१३२

लवत्तरस्मिन्नादेश बाधकत्वं न संभवति बलवत्तरस्यैव हि
दोषो वा सन्नाडवैलो स्वकार्यं कुरुणं करोति-

133